# गायत्रीशिष्टार्थमाला

(उपनिषदाम्, पुराणानां, ऋषीणां, शिष्टमहाभागानां च
सुगन्धविवरणोपदेशपुष्पमाला)



प्रथममुद्रणम्

2012-02-17

# विषयानुक्रमणिका

**विषयानुक्रमणिका .......... ii**
**उपदेशपञ्चरत्नम्.......... 2**
कारिकाः.......... 2
किरणावली .......... 2
**गायत्रीशिष्टार्थमाला.......... 3**
गणपतिशास्त्रिणः भाष्यम्.......... 3
*प्रथमार्थः -- सविता .......... 9*
*द्वितीयार्थः -- नारायणः .......... 11*
*तृतीयोऽर्थः -- परमशिवः.......... 13*
*चतुर्थोर्थः -- परमात्मा.......... 15*
भारद्वाजभाष्यम् .......... 19
याज्ञवल्क्यभाष्यम् .......... 19
वैद्यनाथदीक्षितीयं भाष्यम् .......... 20
स्मृतिचन्द्रिका.......... 20
स्मृतिभास्करः.......... 21
विश्वामित्रभाष्यम्.......... 21
अगस्त्यभाष्यम्.......... 21
मार्कण्डेयभाष्यम् .......... 21
बृहद्पाराशरभाष्यम्.......... 22
मन्त्रदीपिका .......... 22
बह्वृचसन्ध्यामन्त्रार्थदीपिका.......... 22
बह्वृचसन्ध्यापद्धतिभाष्यम् .......... 22
वरदराजीयं नित्यमन्त्रव्याख्यानम्.......... 23
निरुक्तभाष्यम्.......... 23
रावणभाष्यम् .......... 24
गोविन्दस्वामिनः भाष्यम् .......... 24

महीधरभाष्यम् ........................................................................25
सायनभाष्यम् ........................................................................25
उवटभाष्यम् ........................................................................26
भट्टोजीदीक्षितभाष्यम् ........................................................................27
विद्यारण्यभाष्यम् ........................................................................27
तारानाथभाष्यम् ........................................................................28
सीतारामशास्त्रिणः भाष्यम् ........................................................................28
अमुकभाष्यान्तरम् ........................................................................28
गायत्रीहृदयम् ........................................................................29
प्रपञ्चसारः ........................................................................30
गायत्रीस्तवराजः ........................................................................31
गायत्रीतत्त्वम् ........................................................................32
गायत्रीपञ्जरस्तोत्रम् ........................................................................33
आग्नेयनिर्वाणतन्त्रम् ........................................................................33
तैत्तिरीयसन्ध्याभाष्यम् ........................................................................34
गायत्रीपुरश्चरणपद्धतिः ........................................................................37
ब्रह्मपुराणम् ........................................................................39
स्कन्दपुराणम् ........................................................................39
विष्णुधर्मोत्तरपुराणम् ........................................................................39
अप्पय्यदीक्षितभाष्यम् आदित्यस्तोत्ररत्नवृत्तौ ........................................................................40
अप्पय्यदीक्षितभाष्यं शिखरिणीमालायाम् ........................................................................43
शाङ्कराभाष्यम् ........................................................................54

**श्रुतिभाष्यम् ........................................................................ 56**

शाङ्करभाष्यं छान्दोग्योपनिषदि ........................................................................56
गायत्र्योपनिषत् गोपथब्राह्मणस्था ........................................................................60
*कः सविता? का सावित्री? ........................................................................60*
*प्रथमपादार्थः ........................................................................61*
*द्वितीयपादार्थः ........................................................................61*
*तृतीयपादार्थः ........................................................................62*

सावित्र्युपनिषत् सभाष्यम्.......64
मैत्रेयण्युपनिषदि गायत्र्यर्थः.......66
ऋग्वेदः ६।६३।१-४.......71

**अन्ये ऋचः....... 72**
**तैत्तरीये सन्ध्योपासनविधानम्....... 72**
**गायत्रीगीता....... 74**
**गायत्र्याः एव अर्थं प्रतिपादयतः भाष्यान्तराणि....... 77**


श्रीचन्द्रशेखरभारत्याः भाष्यं विवेकचूडामणौ.......77

**गायत्र्याः महत्त्वबोधकश्लोकाः....... 77**
**सन्ध्याकथा विष्णुपुराणस्था....... 80**
**पत्रऋणम्....... 2**
**अन्ये विषयकग्रन्थाः....... 3**

[1] प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः।
अभ्यभाषत काकुत्स्थं शयानं पर्णसंस्तरे॥ रामायणं बा॰ २३-१

कौसल्यासुप्रजा राम पुर्वा सन्ध्या प्रवर्त्तते।
उत्तिष्ठ नरशार्दूल कर्त्तव्यं दैवम् आह्निकम्॥ रा॰ बा॰ २३-२

तस्यार्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ।
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम्॥ रा॰ बा॰ २३-३



न ब्राह्मणो वेदपाठान्न शास्त्रपठनादपि।
देव्यास्त्रिकालम् अभ्यासाद् ब्राह्मणः स्याद्धि नान्यथा॥

विप्रो वृक्षस्तस्य मूलं तु सन्ध्या, वेदाः शाखा सर्वकर्माणि पत्रम्।
अतो मूलं यत्नतो रक्षणीयं, छिन्ने मूले नैव शाखा न पत्रम्॥

महामन्त्रस्य चाप्यस्य स्थाने स्थाने पदे पदे।
गूढो रहस्यगर्भोऽनन्तोपदेशसमुच्चयः॥
यो दधाति नरश्चैतान् उपदेशांस्तु मानसे।
जायते ह्युभयं तस्य लोकम् आनन्दसङ्कुलम्॥

---

[1] विश्वामित्रऋषिः रामं वदति – "भोः, उत्तिष्ठ! सन्ध्याकालः सन्निहितः। आह्निकं कुरु" इति। समनन्तरं गायत्र्योदकं दत्वा, जपः रामलक्ष्मणाभ्यां क्रियते।

# उपदेशपञ्चरत्नम्

वेदो नित्यम् अधीयतां तदुदितं कर्म स्वनुष्ठीयताम्
तेनेशस्य विधीयताम् अपचितिः काम्ये मतिस्त्यज्यताम्॥ १

## कारिकाः

एवं वर्णाश्रमप्रोक्तं कर्म नित्यादिकं च यत्।
तद् एव साङ्गं कुर्वीत येन यज्ञः प्रसीदति॥ २८

फलाभिसन्धिरहितम् अहंकर्तृत्ववर्जितम्।
ॐ तत् सद् इति निर्देशपूर्वकं कर्म आचरेत्॥ २९

कारकः कर्म करणं सम्प्रदानं तथैव च।
सर्वम् ॐ इति संचिन्त्य भक्त्या सर्वेश्वरेऽर्पयेत्॥ ३०

निष्कामकर्मानुष्ठानाद् विशुद्धधिषणः पुमान्।
ज्ञानानुत्पत्तिहेतूनि सर्वपापानि नाशयेत्॥ ३६

## किरणावली

◦ नित्यं च कर्म द्विविधम्। श्रौतं स्मार्तं च। आद्यं अग्निहोत्रादि, द्वितीयम् औपासनादि च। नैमित्तिकं स्कन्नहोमोपरागस्नानादि। ◦ सुष्ठु अनुष्ठानं च कर्मणां साङ्गतया अनुष्ठानम् एव। अङ्गवैकल्ये च कर्मणां सुष्ठुत्वानुपपत्तेः। श्रुतिः च कर्मकर्तव्यतां दर्शयति –"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इति। एवम् उक्तं भवति। साङ्गवेदाध्ययनानन्तरं तदर्थज्ञाने सति विद्वत्तायाः सम्पादितत्वात् उद्वाहानन्तरं विशिष्टकुलप्रसूतेन त्वया अर्थिना समर्थेन सता साङ्गं कर्मानुष्ठेयम् इति।

ननु साङ्गकर्मानुष्ठानेन मम किम् इति आह – **तेनेशस्य विधीयताम् अपचितिः** इति। तेन साङ्गम् अनुष्ठितेन कर्मणा ईशस्य परमेश्वरस्य, अपचितिः पूजा, विधीयतां विधानेन क्रियताम् इति यावत्।

# गायत्रीशिष्टार्थमाला

## गणपतिशास्त्रिणः भाष्यम्

[2] मोक्षमार्गपरिष्कारहेतवे मूर्तिधारिणः।
श्रीशङ्करार्यचरणान् शरणं करवामहै॥ १

अव्याजकरुणामूर्तिम् अविद्याध्वान्तभास्करम्।
श्रीत्यागराजमखिनं देशिकेन्द्रम् अहं भजे॥ २

श्रुतिस्मृतीतिहासानि श्रुत्वा सत्संप्रदायतः।
सावित्र्याः सारभूतोऽर्थः संक्षेपेण निगद्यते॥ ३

गायत्रीजपनिष्ठानां ब्राह्मणानां हि धीमताम्।
ध्येयवस्तुस्वरूपं तद् यथा शास्त्रं विविच्यते॥ ४

उद्यन्तम् अस्तयन्तं चाप्यादित्यं ध्यायतेति नः।
सन्ध्याकर्मविधानाय प्रवृत्ता शास्ति सा श्रुतिः॥ ५

ऐहिकामुष्मिकश्रेयोहेतुरेषोऽवगम्यते।
यद् इन्द्रियनिरोधेन शास्त्रोक्तं ध्यानम् आन्तरम्॥ ६

प्राञ्चो हि मुनयः सर्वे ध्याननिष्ठाबलात्परम्।
अस्माकम् आश्चर्यकरीम् अखिलां सिद्धिम् आप्नुवन्॥ ७

---

[2] श्रीपैङ्गनाडु महामहोपाध्यायः गणपतिशास्त्री श्रीकाञ्चीकामकोठीपीठस्य आस्थानविद्वान् आसीत्॥

यद्यपि ध्यानमार्गोऽयम् इदानीं लुप्त एव नः।
महिमाऽपि न विप्रेषु महर्षिकुलजेष्वपि॥ ८

गूढस्य ध्यानमार्गस्य गुरुशिष्यपरम्परा।
एकैव रक्षणायाभूत् सा चेदानीं विनाशिता॥ ९

आसेतोराहिमाद्रेश्च मृगमाणोऽपि यत्नतः।
एको द्वौ वा भवेतां वा न जाने ध्यानशीलिनौ॥ १०

अहो बत दशा शोच्या सेयम् आर्यद्विजन्मनाम्।
अत्युत्कृष्टो ध्यानमार्गो यद् अगादीदृशीं दशाम्॥ ११

नहि कश्चिन्मृगयते न च कोऽपि कुतूहली।
न च शुश्रूषते प्रीत्या कष्टकालस्य चेष्टितम्॥ १२

सर्वस्यास्य निदानं तु सम्प्रति प्रतिभाति मे।
मूलभूतं यद् एतन्नः सन्ध्योपासनमस्तमैत्॥ १३

मूलं तु सर्वसिद्धीनां गायत्रीसाधनं परम्।
तद् असिद्धौ वृथा सर्वं तत्सिद्धौ च वृथाऽखिलम्॥ १४

चतुर्धा ध्येयवस्तूनि संग्राहादिह बोधये।
यो यत्र शक्तस्तद्वस्तु स ध्यायतु यथामति॥ १५

तत्राखिलप्रेक्षणीयं हाटकद्युतिमण्डलम्।
अशेषलोकचेष्टैकं हेतुभूतनिजोदयम्॥ १६

अक्ष्यनुग्राहकं नृणाम् आराध्यम् अखिलैर्द्विजैः।
आदित्यरूपम् आद्यं स्यादाम्नायमयविग्रहम्॥ १७

द्वितीयं तु द्रुतस्वर्णद्योतमानाखिलाङ्गकम्।
सर्वपाप्मौघसम्बन्धगन्धलेशविवर्जितम्॥ १८

शोणाम्बुजेक्षणद्वन्द्वं पाणौ शङ्खादिधारकम्।
आदित्यान्तर्यामिरूपं श्रीमन्नारायणात्मकम्॥ १९

निटिलाक्षं नीलकण्ठं निरस्ताशेषपाप्मकम्।
उमासनाथम् उत्संज्ञम् उत्फुल्लकम् अलेक्षणम्॥ २०

निर्मृष्टकनकप्रख्यनिखिलाङ्गसमुज्वलम्।
मृदुलस्मितवक्त्राब्जमृडरूपं तृतीयकम्॥ २१

उच्चावचप्राणिजालमनोवृत्यवभासकम्।
अशेषजगदाभासकल्पनास्पदम् अद्वयम्॥ २२

अस्मदादिषु निर्भेदम् आदित्यान्तेषु भासुरम्।
परिपूर्णचिदानन्दपररूपं तुरीयकम्॥ २३

क्रमादमीषु रूपेषु क्रममाणमतिः पुमान्।
संसिद्धिं लभते यद्वा यथेच्छं ध्यायताम् इह॥ २४

यावदो राघवो वाऽथ हयग्रीवोऽथवा गुहः।
उमा वाऽपि रमा वाणी वज्री वा वारणाननः॥ २५

शिवो वा यदि वा विष्णुरन्यद् वा दैवतान्तरम्।
ध्यातुम् इष्टं यद्यद् एतत् ध्यायताऽदित्यमण्डले॥ २६

सर्वेषाम् अपि देवानां सवितुर्मण्डले स्थितिः।
ध्यानं च मन्त्रशास्त्रेषु स्पष्टम् एव विधीयते॥ २७

तस्माद् ऐकाग्र्यम् आस्थाय यतितव्यं शनैः शनैः।
अभ्यासो हि नृणां कालादसाध्यम् अपि साधयेत्॥ २८

देशात् कालात् तथाऽदृष्टाद्देवताया अपीश्वरात्।
सत्यं ब्रवीमि सर्वस्मात् प्रबलं पौरुषं नृणाम्॥ २९

आलस्यजनिता निद्रा अवधूयातिदूरतः।
उत्तिष्ठत ध्यायत च स्वकं माहात्म्यम् आप्नुत॥ ३०

उपदेष्टुर्गुणो वा स्याद्दोषो वेति न चिन्त्यताम्।
उपदेशः समुचितो न वेति तु विचार्यताम्॥ ३१

रहस्ये ध्यानमार्गेऽस्मिन् दिङ्मात्रम् इह दर्शये।
विशेषांस्तत्र तत्रत्यैर्विजानीत महात्मभिः॥ ३२

इह खलु ब्राह्मणानां सर्वेषां सावित्रीजपः एकः एव आवश्यकः। तदुपदेशात् एव मन्त्रतः क्रियमाणं शास्त्रोक्तं द्वितीयं जन्मब्राह्मणानां सिध्यति। तत्सदृशस्य मन्त्रान्तरं नास्ति एव। “न गायत्र्याः परो मन्त्रः (याज्ञवल्क्यः १०।११)” इति स्मृतेः।




पञ्चाक्षराष्टाक्षरादयः अपि मन्त्राः गायत्रीजपानन्तरम् एव जप्यमानाः फलाय कल्पन्ते। न तु ततः प्राक्, तदभावे वा॥

तस्य च गायत्र्याख्यस्य महामन्त्रस्य सहस्रसङ्ख्यया जपः उत्तमः। शतसङ्ख्यया जपः मध्यमः। दशावृत्त्या जपः तु अधमः। अतोऽपि न्यूनसंख्याकः जपः तु अधमाधमः, अशास्त्रीयं च। सः च मन्त्रः पादत्रयात्मकः। तत्र **वरेण्यम्** इत्यन्तः प्रथमः पादः। ततः परं **धीमहि** इत्यन्तः द्वितीयः पादः। अवशिष्टः तृतीयः। अत्र च पादत्रये चतुर्विंशतिसङ्ख्याकानि अक्षराणि भवन्ति। यद्यपि त्रयोविंशतिः एव अक्षराणि श्रूयन्ते, तथापि प्रथमे पादे अन्तिमाक्षरस्य “ण्यम्” इत्येकस्यापि “णि” इति “यम्” इति च (वरेणियम्) अक्षरद्वयात्मकत्वं कल्पयित्वा चतुर्विंशतिसङ्ख्याकत्वं अक्षराणां कल्पनीयम्। इदं च चतुर्विंशत्यक्षरात्मकत्वकल्पनं जपात् अन्यत्र होमादौ एव भवति। जपकाले तु यथाश्रुतं त्रयोविंशत्यक्षरात्मकम् एव जपितव्यम्। गायत्रीसंज्ञके छन्दसि

सर्वत्र संभूय चतुर्विंशत्या वर्णैः यद्यपि भवितव्यं, तथापि यत्र विचृद्गायत्रीसंज्ञकं छन्दः प्रोच्यते, तत्र् एकम् अक्षरं न्यूनं भवति। "एकाक्षरविहीना तु निचृत् इत्यभिधीयते" इति स्मृतेः॥

गायत्रीमन्त्रस्य च जपकाले निचृद्गायत्री एव छन्दः। न तु केवलगायत्री। तथा च स्मृतिः।

"विश्वामित्रऋषिश्छन्दो निचृद्गायत्रम् उच्यते।
देवता परमात्मा वा सविता वा प्रकीर्तितः।
प्राणायामे जपेत्त्वर्घ्यदाने च विनियुज्यते॥" इति। व्यासस्मृतिः

तत्र प्रथमतः प्रणवः, ततः व्याहृतित्रयं, ततः सावित्र्याः पादत्रयम् इति मन्त्रस्वरूपम्। तस्य च जपकाले पञ्च अवसानानि भवन्ति। प्रणवोच्चारणानन्तरम् एकम् अवसानम्। व्याहृतित्रयानतरम् एकम्। सावित्र्याः एकैकपादान्ते एकम् एकम् अवसानम्। इति सम्भूय पञ्च भवन्ति। एवं पञ्चसु स्थलेषु अवसानम् अकृत्वा मन्त्रजपः न कर्तव्यः। "पञ्चावसाना गायत्री पञ्चपातकहारिणी" इति। "अच्छिन्नपादा गायत्री ब्रह्महत्यां प्रयच्छति (वाधूल १४३)" इति च स्मृतेः। यद्यपि मन्त्रविषये ऋषिः, छन्दः, देवता, करन्यासः, अङ्गन्यासः, कवचं, माला, कीलकम् इत्यादिः भूयान् प्रपञ्चः विज्ञातव्यः अस्ति। तथापि तेषां मध्ये अवश्यं विज्ञातव्यं त्रयम् एव। ऋषिः छन्दः देवता चेति। एतत् त्रयम् अविज्ञाय क्रियमाणः मन्त्रजपः न फलाय स्यात्। तथा च श्रुतिः भवति। "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वार्च्छ(च्छ?)ति गर्तं वा पद्यति प्र वा मीयते, तस्मादेतानि मन्त्रे मन्त्रे विद्यात् (आ॰ ब्रा॰ १।१।६)" इति। न्यासादीनाम् अपि अनुष्ठाने विशेषः, अननुष्ठाने न दोषः।

तत्र ऋषिः नाम यः महिम्ना पर्मेश्वरानुग्रहेण च तत्तन्मन्त्रस्य लोके प्रथमतः द्रष्टा, सः एव। तत्तदुपक्रमे च लोके तत्तन्मन्त्रस्य प्रचारः। तथा च यः यस्य मन्त्रस्य ऋषिः भवति, सः एव तस्य मन्त्रस्य आदिगुरुः भवति। यथा च अस्माकं साक्षान्मन्त्रोपदेष्टा गुरुः इदानीन्तनः पूज्यः, तथा तादृशगुरुपरम्परामूलभूतः मन्त्रद्रष्टा गुरुः प्रथमगुरुः

अतितरां पूज्यः। सः सर्वदा न विस्मरणीयः। तस्य च ऋषेः मन्त्रसिद्धिः अवश्यं भवेत्। मन्त्रजपारम्भकाले तदनुग्रहसिद्ध्यर्थं तत्स्मरणम् आवश्यकं भवति।

छन्दः तु, मन्त्राणाम् अक्षरसङ्ख्यापरिच्छेदार्थं भवति। छन्दोज्ञानाभावे मन्त्रेषु अक्षरसङ्ख्यासन्देहस्य निवृत्त्युपायः दुर्लभः स्यात्। यथा अत्रैव गायत्रीमन्त्रे क्व चतुर्विंशतिः अक्षराणि, क्व त्रयोविंशतिः अक्षराणि इति सन्देहः सति, यत्र स्थले निचृद्गायत्रीच्छन्दः, तत्र त्रयोविंशतिः अक्षराणि, अन्यत्र चतुर्विंशतिः अक्षराणि इति छन्दोज्ञानेन एव तत्सन्देहः निवर्तते, न अन्यथा। तस्मात् मन्त्रस्वरूपसन्देहाभावार्थं छन्दोज्ञानम् अत्यावश्यकम्।

देवता तु तत्तन्मन्त्रप्रतिपाद्या मन्त्रजपादिभिः आराध्यमाना स्वयम् उपासकानां काले फलदात्री भवति। सर्वोऽपि मन्त्रजपस्य अङ्गकलापः तत्प्रसादाय एव क्रियते इति सा एव देवता मन्त्रेषु प्रधानम्। तस्याः च मन्त्रदेवतायाः स्वरूपं यथाशास्त्रं विचार्य तत्स्वरूपध्यानेन सह मन्त्रजपः क्रियमाणः वीर्यवत्तरः भवति। विशेषतः च सन्ध्याकर्मविधानाय प्रवृत्ता श्रुतिः ध्यानम् एव प्रधानतया सन्धयोः उभयोः अपि कर्तव्यम् अवबोधयति।

तत्र जपारम्भकाले मन्त्रद्रष्टुः ऋषेः गुरुत्वात् गुरोः च शिरसा वन्दनीयतया प्रथमं शिरस्थाने तस्य न्यासः कर्तव्यः। अनन्तरं छन्दोन्यासः। छन्दसः सर्वस्यापि वागिन्द्रियप्रकाश्यमानतया तत्प्रकाशकवागिन्द्रियस्थाने मुखे तत्तन्मन्त्रसम्बन्धिः छन्दसः न्यासः कार्यः। अथ देवतान्यासः। तत्र सर्वेश्वरस्य परमात्मनः एव तत्तन्मन्त्रप्रतिपाद्यसकलदेवतारूपेण प्रकाशमानतया परमात्मनश्च हृदयगुहावासितया तथाभूतायाः मन्त्रदेवतायाः अपि हृदयस्थाने न्यासः कर्तव्यः इति स्थितिः।

अस्य च गायत्रीमन्त्रस्य विश्वामित्रऋषिः। निचृद्गायत्रीच्छन्दः। सविता, तदन्तर्यामी नारायणः, परमशिवः, परमात्मा वा देवता भवति।

न च एकस्य मन्त्रस्य चतस्रः देवताः इति कथं युक्तं स्यात् इति शङ्क्यम्। एकस्यैव परमात्मनः वस्तुतः तत्तद्देवतारूपेण लोकानुग्रहार्थं वर्त्तमानतया परमार्थतः देवताभेदाभावात्। किञ्च नैव अत्र विरोधः शङ्कनीयः। न हि अस्ति नियमः एकेन

मन्त्रेण अका एव देवता उपासनीया न देवतान्तरम् इति। शास्त्रमूलकं तु एतत्। सति च शास्त्रे एकेनैव मन्त्रेण बह्व्यः अपि देवताः उपासितुं शक्यन्ते। तद्यथा एकम् एव पुरुषसूक्तं शिवविष्णवाद्यनेकदेवताऽराधने विनियुक्तं दृश्यते। इह अपि सवित्रादीनां चतुर्णां गायत्रीप्रतिपाद्यतां शास्त्रं निरूपयति। तच्च शास्त्रं तत्तदर्थनिरूपणावसरे प्रदर्शयामः। शास्त्रे च एकस्य मन्त्रस्य चतुर्धा अर्थस्वरूपनिरूपणम् उपासकानां बुद्धितारतम्यानुसारेण ध्यानसौकर्यार्थं कृतम् इति तत्त्वम्।

## *प्रथमार्थः -- सविता*

तत्र प्रथमं सवितारम् अर्थं प्रतिपादयामः। तथा च स्मृतिः –

“यो देवः सविताऽस्माकं धियो धर्मादिगोचराः।
प्रेरयेत् तस्य यद्भर्गस्तद्वरेण्यम् उपास्महे॥” अगस्त्यः स्मृतिः



इति एतत् स्मृतिवचनानुसारेण गायत्रीपदानां एवम् अन्वयः भवति। “यः नः धियः प्रचोदयात् (तस्य) देवस्य सवितुः तत् वरेण्यं भर्गः धीमहि” इति। अत्र यच्छब्दप्रतिनिर्देशाय तस्य इति षष्ठ्यन्तम् अध्याहृतम्। अर्थः उच्यते।

**देवस्य** प्रकाशमानस्य। **सवितुः** सूर्यस्य, सवितृ-शब्दः हि सूर्ये प्रसिद्धः। **भर्गः** तेजः, भर्गश्शब्दः सकारान्तः तेजोवाची। **धीमहि** ध्यायामः इति।

कीदृशं तेजः इति आह। तत् प्रसिद्धं सर्वेषां प्राणिनाम्। सावित्रं तेजः हि प्रत्यक्षम् एव सर्वप्राणिजालप्रसिद्धं प्रतिदिनम् अनुभूयते, तथा च तद्ध्यानम् अपि जनानां सुकरं भवितुम् अर्हति इति गम्यते।

यद् हि येन प्रसिद्धम् अनुभूयते तदेव तस्य अनायासं ध्यानगोचरीभवति, न अप्रसिद्धम्। न हि अविज्ञातस्वरूपं वस्तु केनचिद् अध्यातुं शक्यते। प्रत्यक्षसिद्धः हि अर्थः ध्यानासमर्थेन अपि स्पष्टम् एव द्रष्टुं शक्यते। क्रमेण च अनुभवदार्ढ्ये सति

ध्यातुम् अपि शक्यते। तस्मात् सर्वप्रत्यक्षम् इदं सवितुः तेजः सुखेन ध्यानयोग्यं भवति इति तात्पर्यम्। अतः एव हेतोः अयम् अर्थः प्रथमम् उच्यते। किञ्च, वरेण्यं वरणीयं प्रार्थनीयं, सर्वैः सर्वेषाम् अपि कर्मणां उपासनानां च यत् प्रार्थनीयं फलं, तत् रूपं इति एतत्।

सवितृरूपम् एव हि सर्वकर्मफलभूतम् इति तृतीयाध्याये छान्दोग्ये मधुविद्यायां समाम्नायते। तत्र हि सवितृमण्डले प्राग्दक्षिणपश्चिमोत्तरोर्ध्वभागेषु पञ्चषु क्रमेण वसुरुद्रादित्यमरुत्साध्यसंज्ञकैः पञ्चभिः देवगणैः उपभुज्यमानं ऋग्यजुःसामाथर्वरस्याख(?)वेदभागमूलकं पञ्चभिः देवफलभूतं लोहितशुक्लकृष्णपरकृष्णक्षुभितरूपात्मकं अमृतपञ्चकं कर्मथा(?)नां पदेन च तेजसः विशेषणेन सर्वकर्मफलभूतं यत्सवितृरूपं तत् सर्वप्राणिप्रसिद्धम् इति श्रुतिः एव बोधयति। तेन च न वैदिकेषु धर्मेषु फलवत्तायां अविश्वासः असंभावना कार्या इति गम्यते। अनेन आधिदैविकं फलभूतां सवितृरूपमुक्तम्। यत् एवभूतं सवितुः तेजः तत् धीमहि इति संबन्धः।

तृतीयपादेन सवितारं विशिनष्टि, **धियः** इति। यः सविता अत्र यच्छब्देन पुंल्लिङ्गेत सवितुः एव परामर्शः, न भर्गसः (भर्गश्शब्दः नपुंसकः), नपुंसकशब्दोपात्तत्वात् तस्य। **नः** अस्माकं, कर्मणि उपासने च अधिकृतानाम्। धियः बुद्धिवृत्तीः, चक्षुरिन्द्रियद्वारिकाः। **प्रचोदयात्** प्रेरयति, ज्ञानानि उत्पादयति। आलोकदानेन इष्टानिष्टवस्तुविषयेषु चाक्षुषज्ञानानि उत्पादयन् अस्मान् अनुगृह्णाति इति एतत्। न हि अप्रकाशमाने सवितरि रूपज्ञानम् अस्माकम् उपपद्यते। अनेन सवितुः आध्यात्मिकं चक्षुः अनुग्राहकं रूपम् उक्तं भवति। तथा च श्रूयते “आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत् (ऐ॰उ॰१।२।४)” इति। एवं च अध्यात्मं सर्वप्राणिनां चक्षुः अनुग्राहकम्। अधिदैवतं च सर्वकर्मफलभूतं सर्वप्रसिद्धं सवितुः तेजः। ध्यायामः इति समुदायार्थः। अत्रायं श्लोकः –

ऋगादिपञ्चवेदभागकर्मजामृतस्फुरत्
यदिष्टवस्तुदृष्टिहेतुरीक्षणाधिदैवतम्।
समस्तलोकदृश्यमानम् अद्भुतप्रभाकरम्
सदापि तद् विभावयामि सौरम् उत्तमं महः॥

इति प्रथमोर्थः।

## *द्वितीयार्थः -- नारायणः*

अथ द्वितीयः। यद्यपि सविता नाम कश्चित् अस्मदाराधनीयःदेवः वर्त्तते, तस्य च मण्डलं तेजोमयं सर्वप्राणिप्रत्यक्षं, तथाऽपि न असौ गायत्रीमन्त्रप्रतिपाद्यः भवति। किन्तु तस्य सवितुः अपि प्रार्थनीयः यः तदन्तर्यामी, तम् एव प्रतिपादयति इति युक्तम्। अत्र हि मन्त्रे सवितुः इति पदस्य समीपवर्तिना “वरेण्य” पदेनैव अन्वयः न्याय्यः। न तु भर्गश्शब्देन व्यवधानात्। तथा च सति सवित्रापि प्रार्थनीयं किञ्चित् तेजोमयं रूपम् एव मन्त्रस्य प्रतिपाद्यं भवितुम् अर्हति। न तु सविता सवितृमण्डलं वा इति प्रतीयते। अपि च धीवृत्तिसामान्यप्रेरकत्वम् अपि अवितुः न उपपद्यते। सविता हि चक्षुषः अनुग्राहकः। चाक्षुषवृत्तिमात्रे यद्यपि प्रेरकः भवेत्, न तु धीसामान्यप्रेरकः। मन्त्रश्च “धियो यो नः” इति सर्वधीप्रेरकम् एव देवम् आह। न तु चाक्षुषवृत्तिमात्रप्रेरकम्। अस्ति च अस्माकम् इव सवितुः अपि अन्तर्यामीदेवः कश्चित्। श्रुतेः तुल्यत्वात्। यथा “य आत्मनि तिष्ठन्नात्मनोऽन्तरो यम् आत्मा न वेद, यस्याऽत्मा शरीरं य आत्मानम् अन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः (बृ॰उ॰३।७।२२)” इति जीवानाम् अस्माकं अन्तर्यामी श्रूयते। तथा “ये आदित्ये तिष्ठ्न्नादित्यान्तरः, यम् आदित्यो न वेदे, यस्यादित्यः शरीरं, य आदित्यम् अन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः (बृ॰उ॰३।७।९)” इति आदित्यदेवतायाः अपि



अन्तर्यामी श्राव्यते एव। मनुष्येषु देवेषु च अन्तर्यामी न भिद्यते। उभयत्राऽपि अन्तर्यामिणः एकत्वश्रवणात्। "यश्चायम् अस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषः, अयम् एव स योऽयम् आत्मा, इदम् अमृतम्, इदं ब्रह्म, इदं सर्वं (बृ॰उ॰२।२।५)" इति आदित्ये जीवेऽपि अन्तर्यामिणः एकत्वम् एव श्रूयते। सः च अयम् अन्तर्यामी भगवान् नारायणः एव। मन्त्रश्च अयं तम् एव प्रतिपादयति।

अत्र भर्गश्शब्देन तेजोवाचिना आदित्यान्तर्यामिणः श्रीनारायणस्य ज्योतिर्मयत्वम् उच्यते। प्रसिद्धिवाचिना तच्छब्देन तस्य ज्योतिर्मयरूपस्य श्रुत्यन्ते प्रसिद्धत्वम् अपि द्योतते। प्रसिद्धं च आदित्यान्तर्यामिणः ज्योतिर्मयरूपत्वं श्रीनारायणात्मकत्वं च श्रुत्यन्तरे। यद्यथा छान्दोग्ये, "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणाखात् सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकम् एवम् अक्षिणी (छा॰उ॰१।६।६-७)" इत्यादि समाम्नायते। तत्र "सर्वम् एव सुवर्णम्" इति अनेन ज्योतिर्मयसकलावयवकत्वं आदित्यान्तर्यामिणः अभिधीयते। "यथा पुण्डरीकम् एवम् अक्षिणी" इति तु तस्य पुण्डरीकाक्षत्वम् आह। प्रसिद्धं च पुण्डरीकाक्षत्वं श्रीनारायणमूर्तेः। अभिधानं च पुण्डरीकाक्षः इति भवति भगवतः नारायणस्य। "गोविन्दः पुण्डरीकाक्ष (अ॰को॰१।१।१९)" इति कोशस्मरणात्। स्मृतिश्च भगवतः नारायणस्य गायत्रीमन्त्रप्रतिपाद्यत्वम् आह।

"ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुः धृतशङ्खचक्रः" इति॥ भविष्यत्॰पु॰ १५५

तथा च अयम् अर्थः पर्यवस्यति। **यः** हिरण्मयशरीरत्वेन श्रुत्यन्तरप्रसिद्धः श्रीनारायणः, **नः** अस्माकं सर्वेषां, **धियः** धीवृत्तीः सर्वाः अपि, **प्रचोदयात्** प्रेरयति अनर्यामी सन्, **तत्** तादृशं, **देवस्य सवितुः** आदित्यस्य उपलक्षणम् इदं सर्वेषां देवानाम्। **वरेण्यं** प्रार्थनीयं, सर्वदेवान्तर्यामिभूतम् अध्यात्मम् अधिदैवं च सर्वजीवप्रेरकम् इति यावत्। **भर्गः** तेजोरूपं भगवन्तं श्रीनारायणम्। **धीमहि** ध्यायामः

इति। सवितृमण्डले स्वस्य हृदयगुहायां च उक्तलक्षणः श्रीनारायणः ध्यातव्यः इति फलितम्। अत्र अयम् श्लोकः --

उत्तप्तस्फुटहाटकद्युतिभरैरुद्योतमानाङ्गकम्
फुल्लद्रक्तसरोजचारुनयनं पूर्णेन्दुबिम्बाननम्।
आदित्यादिसमस्तदैवतगणस्यास्माकम् अप्यान्तरम्
धीवृतीप्रचयप्रचोदकम् इमं ध्यायामि नारायणम्॥

इति द्वितीयोऽर्थः॥

## *तृतीयोऽर्थः -- परमशिवः*

अथ तृतीयः। यद् एतत् आदित्यान्तर्वर्ति ज्योतिर्मयं रूपं, यच्च इदम् अध्यात्मम् आधिदैवतं च अन्तर्यामिरूपं तत् उभयम् अपि उमासहायस्य भगवतः परमशिवस्य रूपम् इत्यपि श्रुतिस्मृतिभ्यः अवगम्यते। तथा हि तैत्तिरीयके, “आदित्यो वा एष एतन्मण्डलं तपति (तै॰आ॰१०।१२)” इत्यादिना आदित्यमण्डलान्तर्वर्तिनं पुरुषम् उपक्रम्य तस्य सर्वात्मकत्वम् उक्त्वा सद्योजातादिपरमशिवमूर्तिभेदप्रतिपादकान् पञ्चब्रह्ममन्त्रान् आम्नाय अनन्तरम् अधीयते “नमो हिरण्यबाहवे हिरण्यवर्णाय



हिरण्यरूपाय निरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः (तै॰आ॰१०।२२)” इति। अत्र हिरण्यवर्णस्य आदित्यान्तर्वर्तिनः पुरुषस्य परमशिवसाधारणं स्पष्टम् एव उमापतित्वादिकं रूपम् उपादिश्यते। तथा शतरुद्रीये भगवान् नीलकण्ठः एव गोपप्रायान् अपि जनान् अत्यन्तमूढान् स्त्रीजनान् अपि आत्मनः दर्शदानेन स्वयम् अनुग्रहीतम् आदित्यरूपेण दयया प्रतिदिनम् आविर्भवति इति प्रतिपाद्यते, “असौ योऽवसर्पति नीलग्रीवो

विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः (तै॰सं॰४।५।१।३)” इति[3]। एवम् श्रुत्यन्तरेषु अपि द्रष्टव्यम्।

छान्दोग्ये तु हिरण्मयरूपमात्रम् आदितान्तर्वर्तिने उपन्यस्तम्। न तु तत्र शिवविष्णोः साधारणं किमपि रूपं श्राव्यते। पुण्डरीकाक्षः इति विष्णोः अभिधानम्। श्रुतिः हि न तत्र श्रूयते। अपि तु यथा “पुण्डरीकम् एवम् अक्षिणी” इति वाक्ये द्विवचनान्तेन अक्षिपदेन नेत्रद्वयम् उक्तम्। एतयोः विकसितपुण्डरीकसाम्यमात्रम् उपवर्ण्यते। तत्तु त्रिणेत्रेऽपि भगवति परमशिवे संभवति एव। तृतीयनेत्रस्य निमीलितत्वेन तस्यापि लोचनद्वयमात्रः एव विकसितपुण्डरीकसादृश्यसंभवात्।

अपि च, गायत्रीमन्त्रे श्रूयमाणः भर्गशब्दः अकारान्तः एव, न तु सकारान्तः। तच्च असाधारणं परमशिवस्य भवति अभिधानम्। “हरः स्मरहरो भर्गः (अ॰को॰१।१।३३)” इति कोशानुशासनात्। अस्य च भर्गशब्दस्य “धियो यो नः” इति तृतीयपादे श्रुतेन यच्छब्देन सह विशेष्यतया अन्वयः। तथा च स्मृतिः भवति।

“देवस्य सवितुर्मध्ये यो भर्गो नो धियः स्वयम्।
प्रचोदयात् तत् वरेण्यं धीमहीत्यन्वयक्रमः॥” निरुक्तभा॰

एवं च **देवस्य सवितुः** मध्ये **यः** हिरण्मयरूपवत्वेन विकसितपुण्डरीकसदृशनयनद्वयशालितया च श्रुयन्तरप्रसिद्धः **भर्गः** परमशिवः **नः**

---

[3] सायनः – यः रुद्रः नीलग्रीवः कालकूटधारणेन नीलवर्णा ग्रीवा यस्य असौ नीलग्रीवः। सः एव विलोहितः विशेषेण लोहितवर्णः सन्, असौ मण्डलवर्ती भूत्वा अवसर्पति उद्यास्तमयौ संपादयितुं प्रवर्तते। तस्य च रुद्रस्य मण्डलवर्तिस्वरूपधारणे प्रयोजनम् उच्यते। उत अपि च गोपाः वेदशास्त्रसंस्काररहिताः गोपालाः अपि एनं मण्डलवर्तिनम् आदित्यरूपिणं रुद्रम् अदृशन् पश्यन्ति। उदहार्यः उदकानां हारिण्यः योषितः अपि एनम् अदृशन् पश्यन्ति। उत अपि च एनं मण्डलवर्तिनम् आदित्यरूपिणं रुद्रं विश्वाभूतानि गोमहिष्यादयः सर्वेऽपि प्राणिनः पश्यन्ति। सर्वेषां दर्शनार्थम् एव हि रुद्रस्य आदि्तयमूर्तिधारणम्। कैलासादिवर्ति रुद्रस्य रूपं तु वेदशास्त्राभिज्ञैः एव दृश्यते, न अन्यैः। तादृशः रुद्रः दृष्टः सन् नः अस्मान् मृडयाति। सुखिनः करोतु इत्यर्थः॥


**धियः प्रचोदयात् तत्** तं **वरेण्यं** सर्वैः प्रार्थनीयं **धीमहि** ध्यायामः इति अर्थः। उक्तलक्षणः भगवान् परमशिवः गायत्र्युपास्यः इति फलितम्। अत्र अयं श्लोकः --

उत्फुल्लारुणपुण्डरीकसुषमासंरञ्जदक्षिद्वयम्।
निर्मृष्टद्रुतहेमनिमलतनुं नीलाम्बुदाभं गळे॥
उत्संज्ञाकम् उमासनाथमुडुराट् कोणावतंसं नृणाम्।
अन्तर्यामिणम् अर्कमण्डलगतं भर्गं सदा भावये॥

इति तृतीयोऽर्थः॥

## *चतुर्थोर्थः -- परमात्मा*

अथ चतुर्थः। यत् इदं हिरण्मयम् अन्तर्यामिरूपं विष्णोः शिवस्य वा गायत्र्युपास्यम् उपन्यस्तम्। तत्र किञ्चित् विवेचनीयम्। यद् एतत् आदित्ये हिरण्मयरूपं, किम् अस्य तेनैव रूपेण अस्माकं धीप्रेरकत्वम् उत रूपान्तरेण इति। तेनैव रूपेण अस्माकं धीप्रेरकत्वं तु न सम्भवति। तस्य रूपस्य अस्मच्छरीरान्तःप्रवेशानुपपत्तेः। ज्योतिर्मयस्य अन्यस्य वा एकस्य शरीरस्य



शरीरान्तरान्तरवस्थानायोगात्। किन्तु रूपान्तरम् एव ऐश्वरम् अस्मद्धृदयगुहायाम् अन्तर्यामितया प्रकाशते इति युक्तं वक्तुम्। अन्तर्यामिणः हि प्रेर्यशरीरातिरेकेण न पृथक् शरीरम् अस्ति। अन्यर्यामिब्राह्मणे “यस्य पृथिवी शरीरम्”, “यस्य आपः शरीरम्”, “यस्य आदित्यः शरीरम् (बृ॰उ॰ ३।७।३,४,९)” इत्यादिना प्रतिपर्यायं प्रेरयितव्यपृथिव्यादिकम् एव अन्तर्यामीणः शरीरं न अतः अतिरिक्तम् इति स्पष्टम् आम्नायते। तथा च स्वरूपेण अशरीरः एव परमात्मा सर्वेषु भूतेषु अन्तर्यामी इति ज्ञायते। शरीराभावाच्च न तत्र

अन्तर्यामिणि वीष्णोः शिवस्य वा परमार्थतः किमपि रूपं शक्यं कल्पयितुम्। सः एव च अशरीरः सर्वभूतगुहाधिवासः परमात्मा गायत्रीमन्त्रेण अपि प्रतिपाद्यते। “उद्यन्तम् अस्त्यन्तम् आदित्यम् अभिध्यायन् (तै॰आ॰२।२)” इति ध्यानं विदधती श्रुतिरपि “ब्रह्मैव सन् ब्रह्माप्येति (तै॰आ॰२।२)” इति ध्यानस्य ब्रह्मभावं फलम् अभिदधाना गायत्र्युपास्यं परमात्मानम् एव स्पष्टम् अवगमयति।

न हि अन्यध्यानात् अन्यत् अवाप्यते। ब्रह्रोपासीनः एव हि ब्रह्मापि एति ति श्लिष्यते। यद्यपि शैवं वैष्णवं च परमात्मनः एव रूपं, तथापि तद्रूपं उपासकानुग्रहार्थं अङ्गीकृतं मायिकम् इति, न तत् परमात्मनः पारमार्थिकः स्वरूपम्। इह तु परमार्थं ब्रह्मैव मन्त्रेण अवबोध्यते। अतः एव “ब्रह्मैव सन् ब्रह्माप्येति” इत्यत्र उपासकस्य पूर्वम् एव ब्रह्मभावं सिद्धं दर्शयति। सिद्धस्य एव हि परमार्थतः ब्रह्मभावस्य अज्ञानतिरोहितस्य ज्ञानेन लाभः इति तत्त्वम्।

भर्गशब्दश्च मन्त्रस्थः अकारान्तः एव स्यात्, सकारान्तः वा। पक्षद्वयेऽपि भासकत्वम् एव तदर्थः इति युक्तम्। तच्च मुख्यं आत्मचैतन्यस्य एव संभवति, न अन्यस्य। न खलु आदित्यादेः बाह्यज्योतिषः चक्षुरादिकरणग्रामस्य वा आध्यात्मिकस्य सर्वावभासकत्वम् अस्ति। स्वप्नविषये तदभावात्। तत्प्रकाशस्य अपि आत्मचैतन्याधीनत्वात्। “तम् एव भान्तम् अनुभाति सर्वम् (क॰उ॰२।२।१५, मु॰उ॰२।२।१०)” इति श्रुतेः। सुषुप्तिसमाध्योः आदित्यादि सद्भावशङ्कया अत्यभावात् च। तस्मात् सर्वव्यापकं स्वप्रकाशचैतन्यज्योतिस्वरूपं ब्रह्मैव गायत्र्या प्रतिपाद्यते इति युक्तम्। स्मृतिं च अत्र उदाहरिष्यामः परस्तात्।

अथ मन्त्रः व्याख्यायते। अत्र तृतीयपादेन शुद्धः अहंपदार्थः प्रत्यगात्मनि समर्प्यते। देवस्य सवितुः वरेण्यम् इति शुद्धः तत्पदार्थः। यत्तच्छदाभ्यां च तयोः ऐक्यम् अनुभाव्यमानं धीमहि इति अनेन अनुसन्धीयते इति स्थितिः।

पदार्थः तु, नः मनुषादिस्थावरान्तानां जीवात्मनाम्। अत्र “नः” इति “धियः” इति च बहुत्वव्यपदेशेन अस्मत्प्रत्ययगोचरेषु शरीरेन्द्रियान्तःकरणान्तानाम् एव भेदः इति

बोध्यते। तेन भेदावलम्बिनां वर्णाश्रमत्वन्ताहन्ताद्यनेक-निमित्तक-लौकिक-वैदिक-कर्मोपास्त्यादि-सर्वव्यवहाराणां तदालम्बनत्वम् इति विवेचितं भवति।

स नि व्यवहारसिद्धं शरीरेन्द्रियान्तःकरणतद्धर्मादिभेदम् अनाश्रित्य आत्मनः भेदः शक्यः निरूपयितुं वर्षशतेन अपि। ते तु तार्किकादयः पारमार्थिकम् एव आत्मकः स्वरूपभेदं तर्कैः प्रतिष्ठापयन्ति, ते भेदशालिनः शरीरेन्द्रियान्तःकरणान्तान् एव अहंप्रत्ययगोचरान् आत्मत्वेन भ्राम्यन्ति। न तु तेषाम् अवभासकं नित्यशुद्धम् आत्मतत्त्वम् अवबुद्ध्यन्ते। अपि च "नः" इत्यनेन भास्यभासकरूपान् क्षेत्रक्षेत्रज्ञसंज्ञातात्मनः निर्दिश्य तेषां मध्ये भासकं यत्क्षेत्रज्ञरूपं तद्वाचिना एकवचनान्तेन "यः" इत्यनेन क्षेत्रज्ञस्य साक्षिणः एकत्वं भासकत्वं च उच्यते, "यः प्रचोदयात्" इति।

तथा च धीपर्यन्तानां क्षेत्रांशानां तत्प्रेरकस्य क्षेत्रज्ञस्य च प्रेर्यप्रेरकभावेन विवेकः प्रदर्शितः भवति। भास्यभासकयोः ऐक्यायोगात्। एकस्य एव चिदात्मनः श्रुतिस्मृतितुक्तिभिः सर्वक्षेत्रावभासकत्वम् उपपद्यते। न तु तस्य भेदः अस्ति सत्यपि क्षेत्रभेदे। तथा च श्रुतिः "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयम् आत्मा" इति। स्मृतिश्च भगवद्गीताख्या "यथा प्रकाशयत्येकः कृत्स्नं लोकम् इमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत (ब॰गी॰१३।३३)" इति।

योगिनां कायव्यूहस्थले एकस्य एव आत्मनः सर्वशरीरावभासकत्वं अकामेन अपि अभ्युपगन्तव्यम्। तस्मात् नास्ति आत्मभेदः। तत् एव क्षेत्रः प्रत्यगात्मा शुद्धः प्रदर्शितः। तस्य प्रेरणात्मना अभेदम् आह "तत्" इति। तत्सर्वक्षेत्रावभासकप्रत्यगात्मरूपं ब्रह्मणः एव हि सर्वेषु क्षेत्रेषु प्रत्यगात्मतया प्रवेशः श्रूयते। "तत् सृष्ट्वा, तद् एवानुप्राविशत् (तै॰उ॰२।६)" इत्याद्यासु श्रुतिषु।

सवितुः उत्पादयितुः, सर्वस्य जगतः उपलक्षणम् इदं स्थितिप्रलययोः अपि। देवस्य उक्तसृष्ट्यादिभिः क्रीडतः सृष्ट्यादिकं हि परमेश्वरस्य लीला एव। "लोकवत् तु लीलाकैवल्यम् (ब्र॰सू॰२।१।३३)" इति न्यायात्। अनेन तत्पदवाच्यं मायाशबलं ब्रह्म

निरूपितम्। तस्य वरेण्यं प्रार्थनीयं, तदपेक्षया अपि उत्कृष्टं निरुपाधिकम् इत्येतत्। भर्गः भासकचिद्रूपम् इत्येतत्। अत्र वरणीयम् इत्यनेन स्वतः सर्वाभिलषणिय-निरतिशयानन्दरूपत्वम् उच्यते। आनन्दस्य च अप्रकाशमानस्य पुरुषार्थत्वायोगेन तस्य प्रकाशमानत्वरूपं चिद्रूपत्वं भर्गश्शबेन उच्यते। जगत्कारण-मायोपाधिक-रूपाधिष्ठानत्वोक्त्या अबाधितत्त्वरूपं सद्रूपत्वम् उक्तम्।

तथा च सत्यज्ञानानन्दलक्षणं ब्रह्म निरूपितं भवति। तत्र अपि शुद्धप्रत्यगात्माभेदबोधकेन तत्पदेन सवितृरूपम् अविशेषयित्वा वरेण्यरूपविशेषणेन विज्ञायते यत् जगत्कारणरूपं मायोपाधिकं न तत्प्रत्यगात्माभिन्नम्। किन्तु सत्य अपि अधिष्ठानं शुद्धचैतन्यम् एव भवति। तथा च तैत्तिरीयके श्रूयते “स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः (तै॰उ॰२।७,३।१०)” इति। एवम् उपपादितं यत् आत्मब्रह्मणोः ऐक्यं, तत् अद्वितीयं स्वरूपं, धीमहि ध्यायामः इति। एवम् अद्वितीय-परिपूर्णात्मस्वरूपानुसन्धानपरः अयं गायत्रीमहामन्त्रः इति स्मृतिरपि विवेचयति -- “यदित्येतत्परं ॰ सत्यज्ञानादिलक्षणः[4] ”॥

अत्र अयं श्लोकः --

ज्ञानाज्ञानमुखं समस्तजगदप्येकेन येन स्फुरेत्।
यस्मिन् सर्वम् इदं जगद्धि रजतं श्क्ताविव द्योतते॥
मर्त्यामर्त्यपशुद्रमप्रभृतिभिर्यद्धार्यते सर्वदा।
चैतन्यं जडवर्गगन्धरहितं ज्योतिस्तदस्म्यान्तरम्॥ इति॥

इत्थम् अत्यन्तसंक्षेपात् श्रुतिस्मृत्यनुसारतः।
अतिपुण्यस्य गायत्रीमन्त्रस्यार्थो निरूपितः॥

सारभूतं यदत्र स्यात् तद्ग्राह्यम् अखिलैर्जनैः।
मानुष्यकप्रमादोत्थम् अन्यत् स्यान्नाम किञ्चन॥

ॐ तत् सत्

---

[4] व्याख्या इयम् अधः प्रकाशिता

## भारद्वाजभाष्यम्

**तत्** इति द्वितीयैकवचनम्। अनेन अखिलजगतुत्पत्तिस्थितिलय-कारण-भूतम् उपनिषदि कथ्यमानं निरुपमं तेजः सूर्यमण्डलाभिध्येयं परब्रह्म अभिधीयते। **सवितुः** इति षष्ठैकवचनम्। षूञ प्राणि प्रसवे इत्यस्य धातोः एतत् रूपम्। सर्वस्य भूतजातस्य प्रसवितुः इत्यर्थः। **वरेण्यं** वरणीयं प्रार्थनीयं नियमादिभिः अपगतकल्मषैः सततं ध्यायेम। **भर्गः** भञ्ज आमर्दने, भृञ भर्जने, इत्येतयोः धात्वोः भजतां पापभर्जनहेतुभूतम् इत्यर्थः। भा दीप्तौ इत्यस्य धातोः वा भर्गः तेजः इत्यर्थः। **देवस्य** वृष्टिदानादिगुणयुक्तस्य निरतिशयस्य इत्यर्थः दीप्यते प्रकाशकत्वात्. **धीमहि** ध्यै चिन्तायां, निगमनिरुक्तविद्यारूपेण चक्षुषा यः असौ आदित्ये हिरण्मयः पुरुषः सोऽहम् इति चिन्तयामि। **धियः** इति द्वितीयायाः बहुवचनम्। **यः** इति छान्दसत्वात् लिङ्गव्यत्ययः। यत् तेजः सवितुः देवस्य वरेण्यम् अस्माभिः अभिध्यातं भर्गः जपतां पापं भञ्जनहेतुभूतं धीमहि उपास्महे। यत् तेजः **नः** अस्माकं धियः बुद्धिः श्रेयष्करेषु कर्मसु **प्रचोदयात्** प्रेरयेत् इत्यर्थः इति।

## याज्ञवल्क्यभाष्यम्

**तच्छ**ब्देन तु यच्छब्दो बोद्धव्यः सततं बुधैः।
उदाहृते तु यच्छब्दे तच्छब्द उदितो भवेत्॥ १

**सविता** सर्वभूतानां सर्वभावांश्च सू(स्तू?)यते।
सवनान् प्रेरणाच्चैव सविता तेन चोच्यते॥ २

**वरणीयं** च यो नित्यं संसारभयभीरुभिः।
आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः॥ ३

भ्रस्ज पाके भवेद्धातुर्यस्मात् पाचयति ह्यसौ।
भ्राजते दीपये यस्माज्जगदन्ते हरत्यपि॥ ४

कालाग्निरूपम् आस्थाय सप्तार्चिः सप्तरश्मिभिः।
भ्राजते तत्स्वरूपेण तस्माद् **भर्गः** स उच्यते॥ ५

भेति भ्राजयते लोकान् रेति रञ्जयते प्रजाः।
ग इत्यागच्छतेऽजस्रं भरगो **भर्ग** उच्यते॥ ६

दीव्यति क्रीडते यस्मादुच्यते शोभते दिवि।
तस्मा**द्देव** इति प्रोक्तः स्तूयते सर्वदेवतैः॥ ७

देवस्य सवितुर्यच्च भर्गम् अन्तर्गतं विभुम्।
ब्रह्मवादिन एवाहुर्वरेण्यं तं च **धीमहि**॥ ८

चिन्तयामो वयं भर्गो **धियो यो नः प्रचोदयात्**।
धर्मार्थकाममोक्षेषु बुद्धिवृत्तिं पुनः पुनः॥ ९

## वैद्यनाथदीक्षितीयं भाष्यम्

**सवितुः** सर्वजगतः प्रसवितुः जगत्कारणस्य देवस्य द्योतन-स्वभावस्य स्वयं प्रकाश-चिदेकरसस्य **वरेण्यं** वरणीयं सर्वैः प्रार्थनीयं सुखैकतानरूपं सर्वैः सुखस्यैव प्रार्थनीयत्वात्। **भर्गः** भ्रस्जदाहे प्रकृति-प्राकृत-लक्षण-संसारस्य दाहकं **यः धियः** धी-वृत्तीः **प्रचोदयात्** सदा प्रेरयति। तस्य बुध्यादि-प्रेरकस्य **सवितुः देवस्य वरेण्यं** परमानन्दैकरसं **भर्गः** सकारान्तः संसारदाहकं निर्गुणं ब्रह्म **धीमहि** ध्यायामः इति॥

## स्मृतिचन्द्रिका

आवाह्य उक्तनामादियुक्तां सन्ध्याशब्दाभिलिप्याम् आदित्याख्यां ब्रह्मात्मिकां देवीं हृदि साऽहम् अस्मि इति ध्यायेत्। तद् उक्तं व्यासेन –

न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह।
साऽहम् अस्मीत्युपासीत विधिना येन केनचित्॥ व्यासः

## स्मृतिभास्करः

**तद्** इत्येतत् परं ब्रह्म ध्येयं तत्सूर्यमण्डले।
**सवितुः** सकलोत्पत्ति-स्थिति-संहार-कारिणः॥ १

**वरेण्यम्** आश्रयणीयं यदाधारम् इदं जगत्।
**भर्गः** स्वसाक्षात्कारेणाविद्या-तत्कार्यदाहकम्॥ २


**देवस्य** ज्ञानरूपस्य स्वानन्दात् क्रीडतोऽपि वा।
**धीमह्य**हं स एवेते तेनैवाभेद-सिद्धये॥ ३

**धियो**ऽन्तःकरण-वृत्तीः प्रत्यक् प्रवण-कारिणीः।
**य** इत्यरूपम् अव्यक्तं सत्य-ज्ञानादि-लक्षणम्॥ ४

**नो**ऽस्माकं बहुधाऽध्यस्तभेदेनानेकदेहिनाम्।
**प्रचोदयात्** प्ररयतुः सत्य-ज्ञानादि-लक्षणम्॥ ५

## विश्वामित्रभाष्यम्

देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात्।
भर्गो वरेण्यं तद् ब्रह्म धीमहीयर्थ उच्यते॥



Vedic Sage

## अगस्त्यभाष्यम्

यो देवः सविताऽस्माकं धियो धर्मादिगोचराः।
प्रेरयेत् तस्य यद्भर्गस्तद्वरेण्यम् उपास्महे॥

## मार्कण्डेयभाष्यम्

कुशबृस्यां निविष्टस्तु कुशपाणिर्जितेन्द्रियः।
अर्कमध्यगतं ध्यायेत् पुरुषं तु महाद्युतिम्॥

## बृहद्पाराशरभाष्यम्

देवस्य सवितुर्भर्गो वरणीयं च धीमहि।
तदस्माकं धियो यस्तु ब्रह्मत्वे  च प्रचोदयात् ॥

## मन्त्रदीपिका

देवस्य सवितुस्तेजो वरेण्यं भर्गसंज्ञितम्।
ध्यायेमहीति शब्दोक्तौ धीमहीत्यर्थ उच्यते॥
यः शब्दश्च यदित्यर्थे लिङ्गव्यत्ययतो भवेत्॥

## बह्वृचसन्ध्यामन्त्रार्थदीपिका

यः सूर्यः प्रेरयति नो बुद्धीर्दीप्तस्य तस्य वै।
ख्यातं स्वरूपं ध्यायेम सेव्यं पापादिभर्जकम्॥ ४

व्याख्या॥ **यः** सविता **नः** अस्माकं **धियः** बुद्धिवृत्तीः **प्रचोदयात्** प्रेरयति तस्य इति अध्याहारः। तस्य **सवितुः** जगत्प्रसवितुः **देवस्य** दीप्तस्य **वरेण्यं** सेव्यं **भर्गः** अविद्यापापादिभर्जकं तत्प्रसिद्धं स्वरूपं **धीमहि** ध्यायेम॥

## बह्वृचसन्ध्यापद्धतिभाष्यम्

यः भर्गो नो धियः प्रचोदयात्।
देवस्य सवितुस्तद्वरेण्यं धीमहि॥

यः सवितृ-नामक-सूर्य-मण्डल-मध्यवर्ती नारायणः जगद्भरणपोषणकर्तृत्वात् ज्ञानगमनकर्तृत्वात् इत्यर्थः। गमनकर्तृत्वात् संसारदाहककर्तृत्वात् वा **भर्गः नः** अस्माकं **धियः** बुद्धीः **प्रचोदयात्** प्रेरयेत्। तस्य **देवस्य** क्रीडादिगुणविशिष्टस्य **सवितुः** जगत्प्रसवकर्तुः नारायणस्य तनोति इति तद्व्याप्तं **वरेण्यं** श्रेष्ठं भजनीयं रूपं वयं **धीमहि** ध्यायेम चिन्तयामः॥

## वरदराजीयं नित्यमन्त्रव्याख्यानम्

तच्छब्दश्रुतेः यच्छदौऽध्याहार्यः। **सवितुः** जगतां प्रसवितुः -- सविता वै प्रसवानामीशे उतेशिषे प्रसवस्य त्वमेक -- इत्यादिश्रुतेः, **वरेण्यं** वृङ् संभक्तौ एण्यप्रत्ययः। सर्वेषां भजनीयं **भर्गः** प्रकाश-प्रदानेन जगतो बाह्यान्तर-तमोभञ्जनाद् वा कालात्मकतया सकल-कर्म-फल-पाक-हेतुत्वेन भर्जनाद् वा वृष्टि-प्रदानेन भूतानां भरणाद् वा **भर्गः देवस्य** द्योतमानस्य **धीमहि**। ध्यै चिन्तायाम्। **देवस्य सवितुर्वरेण्यं** य**द्भर्ग**स्तत् ध्यायामि। तच्छब्दो ब्रह्मवाचकत्वेन प्रसिद्धः -- ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः -- इति भगवद्गीतास्मरणात् (१७।२३)। आदित्यमण्डलान्तर्वर्तिनं पुरुषमनुचिन्तयामः। -- यः एषोऽन्तरादित्ये हिरण्मयः पुरुषः। अथ य एष एतस्मिन् मण्डलेर्चिषि पुरुषः -- इत्यादि तैत्तिरीयश्रुतेः (तैऽअ। १०।१४ पृ ८३५-६) यः सविता **नो**ऽस्माकं **धियः** हानोपादानादि-विषयाणि ज्ञानानि **प्रचोदयात्** प्रचोदयति प्रवर्तयति तस्य **सवितुस्तत् भर्ग** चिन्तयाम इति॥

## निरुक्तभाष्यम्

यद्ब्रह्म नित्यं हृदि सन्निविष्टं मां प्रेरयेत् तिष्ठति नः सुबुद्धिः।
भर्गस्तदाख्यं भजनीयम् एतत् ध्यायामि नित्यं रवि-मण्डलस्थम्॥ १

देवस्य सवितुर्मध्ये यो भर्गो नो धियः स्वयम्।
प्रचोदयात् तत् वरेण्यं धीमहीत्यन्वयक्रमः॥ २

द्युस्थानात् द्योतनाद् वाऽपि भानुर्देव उदाहृतः।
जगत्प्रसवहेतुत्वात् स एव सविता भवेत्॥ ३

तत्सम्बन्धी च यो भर्गः पापानां भञ्जकत्वतः।
अस्माकं कार्यविषये बुद्धीः प्रेरयतीह यः॥
तद्ब्रह्म प्रार्थनीयं स्याद् वरणीयम् उपास्महे। ४

## रावणभाष्यम्

**तत्** तस्य **भर्गः** तेजः **धीमहि** ध्यायेम चिन्तयामः। अत्र यद्यपि तत् इति पदं भर्गोविशेषणं नास्ति तथापि तच्छब्दप्रयोगात् एव यच्छब्दः प्रयोगे उपलभ्यते। तस्य कस्य **सवितुः**? सर्वं भावनानां प्रसवितुः। पुनः किं भूतस्य **देवस्य**? दीप्तिक्रीडादियुक्तस्य। तं कं? **यः** भर्गः **नः** अस्माकं **धियः** बुद्धिः **प्रचोदयात्**।

तत् इह भर्गशब्देन बहुविधमाहात्म्युम् उक्तम्। सवितृमण्डलगता आदित्यदेवता स्वपुरुषः उच्यते अत्र, यद्यपि सवितुः भर्गः इति। सवितृभर्गयोः भिन्नता गायत्रीमन्त्रे प्रतीयते तथाऽपि परमार्थचिन्तायां सवितृभर्गयोः भेदः न विद्यते एव, सः एव सविता, सः एव भर्गः, सवितृभर्गयोः अद्वैतम् एव तथा च राहोशिरः इतिवत् स्पष्टः अभेदत्वसाधकः, पुनः अपि किंभूतः भर्गः वरेण्यं प्रवणीयं प्रार्थनीयम्। जन्म-मृत्यु-दुःख-नाशाय ध्यायेम उपासनीयम् इत्यर्थः। एवं गायत्र्याः तस्य च माहात्म्यम् उपवर्ण्यं पुनः तथैव महाप्रभावं महाव्याहृतिभिः विशेषणीभूतासि अभिधीयते तद्यथा किंभूतः भर्गः भूरादि व्याप्य तिष्ठन् भाति शेषः तथा च भूरादि-त्रैलोक्य-प्रकाशकम्। भूः भूमिलोकः, भुवः भुवर्लोकः अन्तरिक्षं, स्वः स्वर्लोकः, एवम् उपरि क्रमेण अवस्थितान् लोकान् अभिव्याप्य अवतिष्ठमानः असौ भर्गः एतान् त्रीन् लोकान् एव प्रदीपवत् प्रकाशयति इत्यर्थः।

## गोविन्दस्वामिनः भाष्यम्

---

एतद् अक्षरम् एतां च जपन् व्याहृतिपूर्विकाम्।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते॥ बोधायनधर्मसू॰

---

[5] व्याख्यानम्॥ ऋषिच्छन्दोदेवताविनियोगस्मरणपूर्वकः जपः द्रष्टव्यः। न हि एतत् ज्ञानं ऋते श्रौतस्मार्तकर्मप्रसिद्धिः इत्यभियुक्तः उपदेशात्। तत्र प्रणवव्याहृतीनाम् ऋषिः वामदेवः। देवी गायत्री छन्दः। ॐकारसर्वदेवत्यः

[5] गोविन्दस्वामी बोधायनधर्मसूत्रव्याख्याकारः।

पारमेष्ठ्यः। व्यस्तानां व्याहृतीनाम् अग्निः वायुः सूर्यः इति देवताः। सावित्र्याः ऋषिः विश्वामित्रः गायत्री त्रिष्टुप्छन्दः सविता देवता। सन्ध्योपासने विनियोगः। यस्मिन् सर्वम् ओतं प्रोतं च भवति इति ॐकारेण ब्रह्म उच्यते। तच्च सवितृमण्डलमध्यवर्ति। तथा च श्रुतिः – "आदित्यो ब्रह्मेत्यादेशः" इति। सः एव च भूः भवतेः सद्रूपं परं ब्रह्म। भुवः भावयतेः तदेव हि सर्वं भवति इति। देवः स्वः। तथा च यास्कः – "स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति"। **यः देवः** सविता अस्माकं **धियः** कर्माणि पुण्यानि प्रति प्रेरयेत् तस्य **यः भर्गः** तपनहेतुः **वरेण्यं** वरणीयं वरदं वरमण्डलम् अभिचिन्तयामः उपास्महे इति मन्त्रार्थः॥

## महीधरभाष्यम्

**तस्य देवस्य** द्योतनात्मकस्य **सवितुः** प्रेरकस्य अन्तर्यामिणः विज्ञानानन्दस्वभावस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा आदित्यान्तरपुरुषस्य वा ब्रह्मणः **वरेण्यं** वरणीयं सर्वैः प्रार्थनीयं **भर्गः** सर्वपापानां सर्वसंसारस्य च भर्जनसमर्थं तेजः सत्यज्ञानानन्दवेदान्तं प्रतिपाद्य वयं **धीमहि** ध्यायामः। तस्य कस्य? यः सविता **नः** अस्माकं **धियः** बुद्धिः कर्माणि वा **प्रचोदयात्** प्रकर्षेण चोदयति प्रेरयति सत्कर्मानुष्ठानाय।

यद्वा वाक्यभेदेन योजना -- सवितुः देवस्य वरेण्यं भर्गः ध्यायामः। यश्च नः बुद्धिः प्रेरयति तं च ध्यायामः, सः सविता एव। लिङ्व्यत्ययेन योजना -- सवितुः देवस्य तत् भर्गः धीमहि यः यत् भर्गः नः बुद्धिः प्रेरयति॥

## सायनभाष्यम्

यः सविता देवः **नः** अस्माकं **धियः** कर्माणि धर्मादिविषया वा बुद्धीः **प्रचोदयात्** प्रेरयेत् तत् तस्य सर्वासु श्रुतिषु प्रसिद्धस्य **देवस्य** द्योतमानस्य **सवितुः** सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य आत्मभूतं **वरेण्यं** सर्वैः उपास्यतया ज्ञेयतया च सम्भजनीयम्। **भर्गः** अविद्या-तत्कार्ययोः भर्जनात् भर्गः स्वयं ज्योतिः परं ब्रह्मातकं तेजः। **धीमहि तत्**, यः अहं सः असौ, यः असौ सः अहम् इति वयं ध्यायेम।

(यद्वा) तत् इति भर्गः विशेषणम्। सवितुः देवस्य तत् तादृशं भर्गः धीमहि किं तद् इति अपेक्षायाम् आह। यः इति लिङ्गव्यत्ययः यत् भर्गः धियः प्रचोदयात् इति तत् ध्यायेम इति समन्वयः।

(यद्वा) यः सविता सूर्यः धियः कर्माणि प्रचोदयात् प्रेरयति तस्य सवितुः सर्वस्य प्रसवितुः देवस्य द्योतमानस्य सूर्यस्य तत् सर्वे दृश्यमानतया प्रसिद्धं, वरेण्यं सर्वैः भजनीयं भर्गः पापानां पातकं तेजः मण्डलं धीमहि ध्येयतया मनसा धारयेम॥

## उवटभाष्यम्

**तदि**ति षष्ठ्या विपरिणम्यते तस्य **सवितुः** सर्वस्य प्रसवदातुः आदित्यानरपुरुषस्य **देवस्य** हिरण्यगर्भोपाध्यवच्छिन्नस्य वा विज्ञानानन्दस्वभावस्य वा ब्रह्मणः **वरेण्यं** वरणीयं **भर्गः** शब्दः वीर्यवचनः। वरुणात् वा अभिषेचनात् भर्गोपचक्राम। "वीर्यं वै भर्गः" इति श्रुतिः। तेन हि पापं भृञ्जन्ति दहन्ति (भूजी भर्जने) अथवा भर्गः तेजोवचनः यद्वा मण्डलं पुरुषः रश्मयः इत्येव त्रितयम् अभिप्रेयते देवस्य दानादिगुणयुक्तस्य धीमहि (ध्यै चिन्तायाम्) अस्य छान्दसम्प्रसारणं ध्यायामः चिन्तयामः निदिध्यासं तद्विषयं कुर्मः इति यावत् **धियः यः** नः धीशब्दः बुद्धिवचनः कर्मवचनः वा वाग्वचनः बुद्धिः कर्माणि वा वाचः वायुः सविता **नः** अस्माकं **प्रचोदयात्**। यः सवितादेवः नः अस्माकं धियः कर्माणि विषया वा बुद्धिः प्रचोदयात् प्रेरयेत्। तत् तस्य "चुद् सञ्चोदने" प्रकर्षेण चोदयति प्रेरयति तस्य सवितुः सम्बन्धि वीर्यं तेजः वा ध्यायामः इति॥

तत्सवितुः वरणीयं वीर्यं तेजः वा देवस्य ध्यायामः यश्च बुद्धिः प्रचोदयात् प्रेरयति अस्माकं तं च ध्यायामः, सः च सविता एव भवति। लिङ्गव्यत्ययेन वा योजना, तत्सवितुः वरणीयं भर्गः देवस्य ध्यायामः धियः यद्भर्गः अस्माकं प्रेरयति॥

## भट्टोजीदीक्षितभाष्यम्

**तत्** इति, पू प्रेरणे। पूयति प्रेरयति इति। **सविता** सूर्यः तत्सम्बन्धि सूर्यं मण्डलावच्छिन्नम् इति यावत्। दीप्यति इति **देवः** परमात्मा तस्य **वरेण्यं** सर्वैः भजनीयम्, वृञ एण्यः। अविद्यमाकामकर्मादि भर्जनात् **भर्गः** स्वरूपात्कमं ज्योतिः। **धीमहि** तत् एव अहम् अस्मि। तद्दासः अहम् इति वा ध्यायेम **यः** देवः। **नः** अस्माकं धियः बुद्धिः प्रचोदयात् प्रेरयति इत्यर्थः। बाहुलकाल्लऽर्थे लेट्। लेटः अडाटौ इत्याडागमः। भू भुवः स्वः एते त्रयः लोकाः ॐ ब्रह्म एव इति।

## [6] विद्यारण्यभाष्यम्

**तदिति** वाङ्मनोगम्यं ध्येयं यत्सूर्यमण्डले।
**सवितुः** सकलोत्पत्तिस्थितिसंहारकारणः॥ १

**वरेण्यम्** आश्रयणीयं यदाधारम् इदं जगत्।
**भर्गः** स्वसाक्षात्कारेणाविद्यातत्कार्यदाहकम्॥ २



**देवस्य** द्योतमानस्य ह्यानन्दात् क्रीडतोऽपि वा।
**धीमह्य**हं स एवेति तेनैवाभेदसिद्धये॥ ३

**धियो**ऽन्तःकरणवृत्तिश्च प्रत्यक्प्रवणचारिणी।
**य** इत्यलिङ्गधर्मं यत् सत्यज्ञानादिलक्षणम्॥ ४

**नो**ऽस्माकं बहुधाऽभ्यस्तभिन्नभेददृशां तथा।
**प्रचोदयात्** प्रेरयतुः प्रार्थनीयं विचार्यते॥ ५

---

[6] कुत्रचित् अमुकभाष्यम् इति चिह्नम्। पाठान्तरं वर्तते।

## तारानाथभाष्यम्

**सवितुः देवस्य भर्गा**ख्यं परब्रह्म स्वरूपं तेजः। चिन्तनीयं मम हृत्पद्मस्थितेन एव भर्गाख्येन तेजसा प्रेर्यमाणः तदेव भूर्लोकान्तरिक्षलोकस्वर्लोकादि ब्रह्माण्डोदत्वृत्ति-सकल-चराचर-त्रैलोक्य-स्वरूपं मम हृदये बाह्ये च सूर्यमण्डले वर्त्तमानतेजसा एकीभूतं परब्रह्मस्वरूपज्योतिः अहम् इति चिन्तयन् जपं कुर्यात् इति॥

## सीतारामशास्त्रिणः भाष्यम्

**यः** सर्वजगदन्तर्यामी "यः सर्वाणि भूतान्यन्तरो यमयति" इति श्रुतिसिद्धः **नः** तत्तदन्तःकरणाद्युपाधिभेदभिन्नानां जीवानाम् अस्माकं **धियः** धीवृत्तीः तत्तत्प्राणिकर्मसापेक्षः सन् स्वर्गादिसाधनकाम्यकर्माद्यनुष्ठानेषु तत्त्वसाक्षात्कारं प्रति बहिरङ्गसाधननिष्कामकर्मानुष्ठानेषु अन्तरङ्गसाधनेषु श्रुत्यन्तश्रवणतदर्थमनननिदिध्यासनेषु च **प्रचोदयात्** प्रेरयति। "यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः" इति श्रुतेः। तस्य बुद्ध्यादिप्रेरकस्य **सवितुः** सर्वजगत्प्रसवितुः "जन्माद्यस्य यतः" इत्यधिकरणन्यायेन सर्वजगत्कारणस्य **देवस्य** द्योतनस्वभावस्य "तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति" इति श्रुत्यां चराचरात्मकसर्वजगदवभासकस्य **वरेण्यं** वरणीयं सर्वैरपि मुमुक्षुभिः प्रार्थनीयं शुद्धसत्त्वप्रधानमायोपाधिविनिर्मुक्तपारमार्थिकस्वरूपम् अखण्डसच्चिदानन्दलक्षणं कालतः देशतः वस्तुतश्च अपरिच्छिन्नं तत्पदलक्ष्यं **भर्गः** अत्रत्यभर्गःशब्दः सकारान्तः, भृज दाहे इत्यस्मात् धातोः स्वसाक्षात्कारेण अनादिजन्ममरणपरम्परारूपं संसारबीजभूतमूलाज्ञानदाहकं सवयंज्योतिः निर्गुणं ब्रह्म **दिहिमहि** स्थूलसूक्ष्मकारणाख्यशरीरत्रयविनिर्मुक्तप्रत्यगात्मत्वेन ध्यायामः इति निष्कृष्टोऽर्थः।

## अमुकभाष्यान्तरम्

(शङ्कराचार्येण रचितम् इति केषाञ्चन विश्वासः तमिलुराज्ये)

सर्वबुद्धि-संज्ञान्तःकरण-प्रकाशकः सर्वसाक्षी प्रत्यगात्मा इति उच्यते। तस्य प्रचोदयात् शब्दनिष्टस्य आत्मनः स्वरूपभूतं परं ब्रह्म **तत्सवितुः** इत्यादि-पदैः निर्दिश्यते। अत्र तच्छब्देन प्रत्यग्भूतं स्वतःसिद्धं परं ब्रह्म उच्यते। **सवितु**रिति सृष्टि-स्थिति-लय-लक्षणस्य सर्वप्रपञ्चस्य द्वैतभावस्य अधिष्टानं लक्ष्यते। **वरेण्यम्** इति सर्ववरणीयं निरतिशयानन्दरूपम्। **भर्ग** इति अविद्यदि-दोष-भर्जनात्मक-ज्ञानैकविषयत्वात्। **देवस्य** इति सर्व-द्योतनात्मकाखण्डचिदेकरसाम्। सवितुर्देवस्य इत्यत्र षष्टर्थो राहोः शिरोवद् औपचारिकः बुद्ध्यादि सर्वदृश्यस्य साक्षिलक्षणम्। यन्मे स्वरूपं तत् सर्वाधिष्टानरूपं परमानन्दम्। निरस्तसमस्तानर्थरूपं स्वप्रकाशचिदात्मकं ब्रह्म इत्येकम्। **धीमहि** धायेम। एवं सति प्रत्यगात्मनो ब्रह्मणा सह तदात्म्यरूपम् एकत्वं भवति। तथा सर्वात्मक-ब्रह्म-बोधकोऽयं गायत्रीमन्त्रः सम्पयते।

## गायत्रीहृदयम्

ब्रह्मोवाच -- **भूः** इति भूर्लोकः। **भुवः** अन्तरिक्षम्। **स्वः** इति स्वर्लोकः। **महः** इति महर्लोकः। **जनः** इति नजलोकः। **तपः** इति तपोलोकः। **सत्यम्** इति सत्यलोकः।

**तद्** इति तेजः। तेजसः अग्निः देवता **सवितुः** इति सविता, आदित्यः यः। **वरेण्यं** वरेण्यम् इति अन्नं वरेणियम् अन्नम् एव प्रजापतिः। **भर्गः** इति आपः वै भर्गः। तद् आपः तत्सर्वाः देवताः। **देवस्य** इति यः वै देवः यः पुरुषः सः विष्णुः। **धीमहि** इति ऐश्वर्यं यद् ऐश्वर्यं तत् महेश्वरः। **धियः** इति सप्राणः अयं वायुः। **यः** इति अध्यात्मं तत्परमं यः। **नः** इति पृथ्वी इयं योनिः। **प्रचोदयात्** इति कामं कामायत् तम् इमं लोकं लोकाः प्रत्याचक्षते। **परः** इति परं लोकः। परात् लोकम् एकोत्तरशतं पितरम् (?)। **रजसे** इति राजसयोगम् इति एकादश रुद्राः विश्वेदेवाः। **असावदोम्** इति ब्रह्म।

**आपः** इति अप्सरः लोकः। **ज्योतिः** इति गन्धर्वलोकः। **रसः** इति किन्नरलोकः। **अमृतम्** इति ब्रह्मलोकः। सत्यम् इति सत्यं ज्ञानम् अनन्तं **ब्रह्म**। **भूर्भुवःस्वरोम्** इति त्रैलोक्यम्। ॐ तत् सत् परं ब्रह्म तस्मात्। अथ संशयो न स्यात् तत्परमो धर्मः इति एषा वै गायत्री॥

## प्रपञ्चसारः

[7] भूःपदाद्या व्याहृतयो भूः शब्दस्तदिति वर्तते।
तत्पदं सदिति प्रोक्तं सन्मात्रत्वात् तु भूरतः॥ १

भूतत्वात् करणत्वाच्च भुवःशब्दस्य सङ्गतिः।
सर्वस्य स्वीरणात् स्वात्मतया च स्वरितीरितम्॥ २

**तद्** द्वितीयैकवचनम् अनेनाऽखिलवस्तुनः।
सृष्ट्यादिकारणं तेजो रूपम् आदित्यमण्डले॥ ३

अभिध्येयं सदानन्दं परं ब्रह्माऽभिधीयते।
यत्तु **सवितु**रित्युक्तं षष्ठ्येकवचनात्मकम्॥ ४

धातोरिह विनिष्पन्नं प्राणिप्रसववाचकात्।
सर्वासां प्राणिजतीनाम् इति प्रसवितुः सदा॥ ५

**वरेण्यं** वरणीयत्वात् सेवनीयतया तथा।
भजनीयतया सर्वैः प्रार्थनीयतया स्मृतम्॥ ६

पूर्वस्याष्टाक्षरस्यैवं व्याहृतिर्भूरिति स्मृता।
पापस्य भर्जना**द्भर्गो** भक्तस्निग्धतया तथा॥ ७

**देवस्य** वृष्टिदानादिगुणयुक्तस्य नित्यशः।
प्रभूतेन प्रकाशेन दीप्यमानस्य वै तथा॥ ८

ध्ये चिन्तायाम् अतो धातोर्विष्पन्नं **धीमही**त्यतः।
निगताद्येन दिव्येन विद्यारूपेण चक्षुषा॥ ९

---

[7] आप्रपञ्चसारं शङ्कराचार्येण रचितं इति केषाञ्चन विश्वसः।

हश्यो हिरण्मयो देव आदित्ये नित्यसंस्थितः।
हीनता रहितं तेजो यथा स्यात् स हिरण्मयः॥ १०

यः सूक्ष्मः सोऽहम् इत्येव चिन्तयामः सदैव तु।
द्वितीयाष्टाक्षरस्यैवं व्याहृतिर्भुव ईरिता॥ ११

**धियो** बुद्धिर्मनोरस्य छान्दसत्वाद्य ईरितः।
कृतश्च लिङ्गव्यत्यातः सूत्रात् सुपतिङ् उपग्राहत्॥ १२

**यत्** तु तेजो निरुपमं सर्ववेद(वेद)भयात्मकम्।
भजतां पापनाशस्य हेतुभूतम् इहोच्यते॥ १३

**न** इति प्रोक्त आदेशः षष्ठ्यसौ युष्मदस्मदोः।
तस्मादस्माकम् इत्यर्थं प्रार्थनायां **प्रचोदयात्**॥ १४

## गायत्रीस्तवराजः

गायत्रीं वेदधात्रीं शतमखफलदां वेदशास्त्रैकवेद्याम्।
चिच्छक्तिं ब्रह्मविद्यां परमशिवपदां  श्रीपदं वै करोति॥
सर्वोत्कृष्टं पदं तत्सवितुरनु पदान्ते वरेण्यं शरण्यम्।
भर्गो देवस्य धीमहभिदधति धियो यो न इत्येव तेजः॥

साम्राज्यबीजं प्रणवत्रिपादं सव्यापसव्यं प्रजपेत् सहस्रम्।
सम्पूर्णकामं प्रणवं विभूतिं तथा भवेद् वाक्यविचित्रवाणी॥ १

ॐकार-शब्दोऽखिललौकिकं च श्रीभूर्भुवः स्वर्महरेव युक्तम्।
जनस्तपः सत्यम् अथोदितं च कौलाक-वौकुण्ठमयोऽर्ध्वकेशः॥ २

तदष्टरूपेऽष्टक-भैरवाश्च यद् विश्वरूपं सवितुः प्रसिद्धम्।
चैतन्यम् एतत् कथितं वरेण्यं यत् सच्चिदानन्दपदं च भर्गः॥ ३

भर्गो हि देवः परमेश्वरोऽसौ तद् धीमहीतीश्वरम् एव नित्यम्।
यो नो धियो यः परभक्तिभाजं प्रचोदयात् सा त्रिपदा प्रसिद्धा॥ ४

ततः परो वै रजसे प्रसिद्धं यत् सावदों तत् कथितं चतुर्थम्।
पादं त्रिपाद्याः परमेश्वरेण त्रय्येहितं धारयितुं नरेण॥ ५

अनामयं सत्सवितुर्वरेण्यं भर्गो हि देवस्य शिवाय धीमहि।
ऋतं सतां क्लेशहरं हिताय धियो हि यो नः सततं प्रचोदयात्॥ ६

ततः परो वै रजसे च सावदों श्रीं-बीजयुक्तं कथितं चतुर्थम्।
भूरादि-सप्त-प्रणवोदितं वै तद् विंशतेरक्षर-कार्यसिद्धिः॥ ७

कालात्रयसम्वितं चक्रचिन्तनम् --
मुलाधारे हुतवहकलामिश्रितं भूर्भुवः स्वर्-
ब्रह्मस्थाने परम-गहने तत्सवितुर्वरेण्यम्।
भर्गो देवस्य च शशिकला धीमहीत्येकरूपम्
धी यो यो नः परमम् अमृतं चोदयाद् वै परस्मात्॥ १०

## गायत्रीतत्त्वम्

चतुर्विंशतितत्त्वानां यद् एकं तत्त्वम् उत्तमम्।
अनुपाधिपरं ब्रह्म तत्परं ज्योतिरोम् इति॥ १

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य तत्परं ज्योतिरोम् इति॥ २

तत्सदादिपदैर्वाच्यं परमं पदम् अव्ययम्।
अभेदत्वं पदार्थस्य तत्परं ज्योतिरोम् इति॥ ३

यस्य मायांशभागेन जगदुत्पद्यतेऽखिलम्।
तस्य सर्वोत्तमं रूपम् अरूपस्याभिधीमहि॥ ४

यं न पश्यन्ति परमं पश्यन्तोऽपि दिवौकसः।
तं भूतानिलदेवं तु सुपर्णम् उपधावताम्॥ ५

यदंशः प्रेरितो जन्तुः कर्मपाशनियन्त्रितः।
आजन्मकृतपापानाम् अपहन्तुं दिवौकसः॥ ६

## गायत्रीपञ्जरस्तोत्रम्

जगतः प्रसवित्रीं तां सवितुः सृष्टिकारिणीम्।
वरेण्यम् इत्यन्नमयीं पुरुषार्थफलप्रदाम्॥ २४

अविद्यावर्णवर्ज्या च तेजोवद्भर्गसंज्ञिकाम्।
देवस्य सच्चिदानन्दपरब्रह्मरसात्मिकाम्॥ २५

धीमह्यहं स वै तद्वद् ब्रह्माद्वैतस्वरूपिणीम्।
धियो यो नस्तु सविता प्रचोदयादुपासिताम्॥ २६

परोऽसौ सविता साक्षादेनो निर्हरणाय च।
परो रजस इत्यादि परं ब्रह्मसनातनम्॥ २७

## आग्नेयनिर्वाणतन्त्रम्

त्र्यक्षरात्मकतारेण परेशः प्रतिपाद्यते।
पापकर्ता च संस्रष्टा यो देवः प्रकृतेः परः॥ १

असौ देवस्त्रिलोकात्मा त्रिगुणं व्याप्य तिष्ठति।
यतो विश्वमयं ब्रह्म वाच्यं व्याहृतिभिस्त्रिभिः॥ २

ताराव्याहृतिवाच्ये यः सावित्र्या ज्ञेय एव सः।
जगद्रूपस्य सवितुः संस्रष्टुर्दीप्यते विभोः॥ ३

प्रान्तर्गतं महद्वर्चो वरणीयं यतात्मभिः।
धायेम तत्परं सत्यं सर्वव्यापिसनातनम्॥ ४

यो भर्गः सर्वसाक्षी च मनोबुद्धीन्द्रियाणि नः।
धर्मार्थकाममोक्षेषु प्रेरयेद् विनियोजयेत्॥ ५

## तैत्तिरीयसन्ध्याभाष्यम्



दीव्यति उदयास्तंगमनाभ्यां लोकयात्रां प्रवर्तयन् देशान्तरं याति इति देवः। देवु क्रीडादौ। पचाद्यच्। दीव्यति प्रकाशते इति वा देवः। द्युलोकवर्तित्वात् वा देवः। ध्यातत्वात् हृदयारविन्दमध्ये क्रीडति इति वा देवः। “देवो द्युलोकवर्तित्वाद्देवनाद्देवनेन वा” इति अभिधानात्। तस्य **देवस्य**। **तत्** इति षष्ठ्या परिणम्यते तस्य इत्यर्थः। “सुपां सुलुक्” इति पाणिनिस्मरणात्। सूते सकलजननिर्वृतिहेतुं वृष्टिम् इति **सवितुः**। “ण्वुल्तृचौ” इति तृच्। “याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति” इति श्रुतेः।

“अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यम् उपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः” इति स्मृतेश्च॥

यद्वा सौति सकलश्रेयांसि ध्यातॄणाम् इति सविता। “उद्यन्तमस्तं यन्तम् आदित्यम् अभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रम् अश्नुते” इति श्रुतेः। एवंविधस्य आदित्यस्य भगवतः सम्बन्धि **वरेण्यं** पुरुषार्थकामिभिः वरणीयं श्रेष्ठं वा। तन्वादीनां विकल्पेनेयङुवङिडत्यनेनेयङादेशः। **वरेण्यं** इत्यत्र वर्णचतुष्टयं परिज्ञेयं, न तु उच्चरणीयम् इति वृद्धाः प्रवदन्ति। भर्जति तम् अस्काण्डं हन्ति इति **भर्गः** तेजः। “अञ्च्यञ्जियुजिभृजिभ्यः कुश्च” इत्यौणादिकसूत्रेण असुन्प्रत्ययः कवर्गश्चान्तादेशः। सान्तम् एतत्। शिवपरस्य एव भर्गशब्दस्य अदन्तत्वं पुंस्त्वं च न अर्थान्तरपरस्य अपि

तन्नियमः। “महन्मेऽवोचो भर्गो मेऽवोचः” इति सोमसूत्रे तथा दर्शनात् इति विवेकः। अतः एव आर्यप्रणीतशोकः अपि अस्ति –

“भर्गः सूर्यात्मकं हारि महसो वाचकत्वतः” इति

**धीमहि** ध्यायेमहि। प्रार्थनायां लिङ्। ध्यायतेः संप्रसारणं छान्दसम्। “ध्यायेमहि इति शब्दोक्तौ धीमहि इत्येतत् उच्यते” इति पूर्वव्याख्यातृवचनात्। एते छात्रादिसहिताः वयं सौरं तेजः ध्यायेमहि इति पिण्डितार्थः। एतेन न बहुवचनानुपपत्तिः। ध्यानधारानैरन्तर्यविवक्षया वा बहुवचनोपपत्तिः इति द्रष्टव्यम्। तद्यदर्थं तदाह – धियः इति। **यः** सविता **धियः**। **धियः** इति द्वितीयाबहुवचनम्। **प्रचोदयात्** प्रकर्षेण प्रेरयति सकलकर्मानुष्ठानप्रवणाः दुष्कर्मविमुखाः च अस्मद्बुद्धीः करोति, तस्य सवितुः तेजः ध्यायेमहि इति सम्बन्धः। प्रचोदयात् इति लेट्पाठश्छान्दसः। एवम् “उतैनं गोपा अदृशन्” इति श्रुतिपर्यालोचनया आदित्यस्य अपि शिवपरत्वात् शिवपरत्वम् उक्तम्। वस्तुतः तु गायत्रीमन्त्रः साक्षात् शिवपरः एव। तथा हि **सवितुः देवस्य** सवितृरूपदेवस्य इत्यर्थः। राहोः शिरः इतिवत् औपरारिकी षष्ठी। मण्डलान्तर्गतम् इति शेषः॥

“मण्डलान्तर्गतं हिरण्मयं भ्राजमानवपुषं शुचिस्मितम्।
चण्डदीधितिमखण्डविग्रहं चिन्तये मुनिसहस्रसेवितम्” इति श्रुतेः॥

**वरेण्यं** श्रेष्ठं, शिवस्य ब्राह्मणदैवतत्वात्। **तत्** इति द्वितीयया परिणमते। सुपां सुलुगित्यम्विभक्तेः लोपः। तं सदाशिवं **धीमहि** ध्यायेमहि। सदाशिवध्यानस्य पृथग्जनदुष्प्रापस्य एकेन कर्तुम् अशक्यत्वात् तदनुसन्धानकुशलैः पुरुशपूण्डरीकैः सह दर्तुं शक्यत्वात् बहुत्वोक्तिः इति ध्येयम्। तत्किमर्थम् इत्यतः आह – **धियः** इति। **यः भर्गः** शिवः पूर्वपादावस्थस्य अपि भर्गशब्दस्य अन्वयबलात् अनुषञ्जनं कार्यम् इति विवेकः। **नः** अस्मान् **धियः** अज्ञानात्। धीशब्दः अत्र व्यतिरेकलक्षणया अज्ञानपरः। धीरे कातरशब्दवत्। **प्रचोदयात्** प्रकर्षेण अज्ञानपारं गमयेत् इति प्रार्थ्यते इत्यर्थः। अस्मिन् अर्थे श्रुतिः –

“उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षी तमसः प्रसतात्॥” इति

तमसः अज्ञानात् परस्तात् पारम् इति श्रुत्यर्थः।

सर्ववेदान्तसिद्धान्तम् अवलम्ब्य प्रकाशये।
गायत्रीनिगमार्थोऽयं सदाचार्यप्रसादतः॥

तत् इति। दीव्यति नन्दति इति देवः। अखण्डानन्दैकरसः इत्यर्थः। तत् इति षष्ठ्या परिणम्यते। तस्य देवस्य। सूते नानोपासनाफलानीति सविता। निर्विशेषस्याऽपि तत्तदाकारेणोपासितस्य तत्तत्फलजनकत्वाभुपगमात्। यद्वा सूते जगन्ति इति सविता अकलजगदुपादानकारणम् इत्यर्थः। “सविता प्रसवानाम् ईशे। सविता प्रसवानाम् अधिपतिः” इति वाक्याभ्यां सवितृशब्दस्य उत्पत्त्यर्थकत्वात्। इदं च जगत्पालयितृत्वजगत्संहर्तृत्वयोः अपि उपलक्षणम्। तथा च जगदुत्पत्तिस्थितिलयकारणत्वं लभ्यते। तत् इति ब्रह्मवाचि षष्ठ्यन्तम्। सुपां सुलुग् इति पाणिनिस्मरणात्। “ॐ तत्सद् इति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन” इति वचनेन तच्छदस्य ब्रह्मवाचकत्वात्। “वरेण्यं पुरुषार्थकामिभिरर्थ्यमानं श्रेष्ठं वा भर्गः अविद्यादिदोषभर्जकं तेजः”। “वीर्यं वै भर्गः” इति श्रुतेः। वीर्यं तेजः इति श्रुत्यर्थः। “भर्गस्तेजोवचनः” इति वृद्धैः पूर्वं व्याख्यातत्वात् च। अत्र प्राचिनाः भर्गः वृजिनभर्जनात् इति भर्गपदं निराहुः। ब्रह्मणः तेजोरूपत्वे ऽपि एषः अस्य परमः आनन्दः इतिवद् भेदव्यपदेशः औपचारिकः इति द्रष्टव्यम्। तथा च अद्वयानन्दलक्षणं सर्वजगदुपादानं परिपूर्णज्योतीरूपबिम्बस्थानीयं ब्रह्म वाक्यार्थतया पर्यवसन्नम्। एतादृक् ब्रह्म तद्रूपत्वेन इति शेषः। “धीमहि” ध्यायेमहि। ननु कोऽसौ ब्रह्माभेदः विवक्षितः इति आशङ्क्य प्रत्यग्रूपः इत्याह – धियः इति। **यः** प्रत्यङ् **नः** अस्माकं **धियः** बुद्धीरन्तःकरणवृत्तीः इत्यर्थः। **प्रचोदयात्** प्रेरयति। अन्तःकरणवृत्त्यादिकं प्रकाशयति इति यावत्। तथा च अन्तःकरणतद्धर्मावभासकसाक्षित्वेन पूर्वोक्तं ब्रह्म ध्यायेमहि इति निर्गलितार्थः। वस्तुतः तु पूर्वोक्तं ब्रह्म धीमहि सोऽहम् इति प्रत्यग्लक्षणतया ध्यायेमहि। ननु न ब्रह्म प्रत्यग्लक्षणं, प्रत्युत तद्विलक्षणम् एव कर्तृत्वाद्यनाश्रयत्वात्

इति आशङ्क्य तस्य प्रत्यग्विलक्षणत्वम् एव असिद्धम् इति आह – धियः इति। **यः** प्रत्यग्ब्रह्म, पुंस्त्वनिर्देशः छान्दसः।

“यःशब्दश्च यदित्यर्थे लिङ्गव्यत्ययतो भवेत्”।

इति लौहित्यनीलकण्ठवचनात्। जीवात्मना प्रविश्य **धियः** बुद्धीः अन्तःकरणवृत्तीः **प्रचोदयात्** प्रकाशयति। तथा च बिम्बस्थानीयं ब्रह्मैव साक्षिरूपम् इति प्रत्यग्लक्षणध्यानम् उपपन्नम् इति न कश्चित् दोषः। तस्मात् पक्षद्वयेऽपि प्रत्यग्ब्रह्मैक्यम् एव पर्यवस्यति इति पूर्णब्रह्म एव गायत्रीमन्त्रार्थः।

अथ गायत्रीमन्त्रार्थः श्लोकरूपेण विद्यारण्यस्वामिभिः उदाहृतः। ते श्लोकाः उदाह्रियन्ते – तदिति ॰ विचार्यते इति।[8]

## गायत्रीपुरश्चरणपद्धतिः

[9] अर्थं विना प्राणायामफलं न स्यात्, “योऽर्थज्ञः इत्सकलं भदरम् अश्नुते” इति वचनात्। यद्यथा -- अथ सर्वदेवतात्मनः सर्वशक्तेः सर्वाविभासकृतः तेजोमयस्य परमात्मनः सर्वात्मक[त्व]द्योतनार्थं सर्वात्म[त्व]प्रतिपादकः अयं गायत्रीमन्त्रः। गायन्तं त्रायते यस्मात् गायत्री। प्राणान् ऊर्ध्वम् उन्नामयते इति प्रणवः। प्राणानाम् आयामः यत्र क्रियते। ततः प्राणायामः। तत्र गायत्रीं प्रणवादिसप्तव्याहृत्युपेतां शिरःसमेतां सर्ववेदसाराम् इत्यथर्वाङ्गिरसम्। एवं विशिष्टां गायत्रीं प्राणायामैः उपास्य ब्रह्मरूपः भवति॥

ॐ तत् सत् इति निर्देशः ब्रह्मणः त्रिविधः स्मृतः॥

**भूः** इति सन्मात्रमन्त्रः उच्यते। **भुवः** इति सर्वं भावयति प्रकाशयति इति व्युत्पत्त्या चिद्रूपम् उच्यते। **सुवः** इति सुष्ठु सर्वेषु प्रीयमाणं सुखरूपं परमानन्दं

---

[8] विद्यारण्यभाष्यं पूर्वत्र मुद्रितम्।

[9] पद्धतिः इयं शङ्कराचार्यस्य कृतिः इति केषाञ्चन विश्वासः।

ब्रह्मपदम्। [10]**तपः** इति सर्वतेजोरूपम्। **सत्यम्** इति सर्वबाधाविरहितम् उच्यते। सत्यं ज्ञानम् अनन्तं ब्रह्मेति **भूर्भुवःस्वरोम्** इति त्रैलोक्यं समस्तव्याहृत्यर्थः।

**तद्** इति द्वितीयैकवचनम् अनेन अखिल-जगदुत्पत्ति-स्थिति-लय-कारण-हेतु-भूतम् उपनिषदि कथ्यमानं निरुपमं तत्सद्ब्रह्म तेजोमयं तत्सूर्यमण्डलाभिधेयं ब्रह्माभिदीयते। "असावादित्यो ब्रह्मेति वचानत्"। **सवितुः** इति षष्ठ्यैकवचनं षुञ् प्राणिप्रसवे इत्येतस्य धातोः एतद्रूपं सर्वप्राणिमात्रप्रसवितुः इत्यर्थः। **वरेण्यं** प्रार्थनीयं नियमादिभिः अपहृतकल्मषैः सततं ध्येयम् इत्यर्थः। **भर्गः** भञ्जः आमर्दने, भृजि भर्जने, इत्येतयोः धात्वोः रूपं भजतां पापभर्जनहेतुभूतम् इत्यर्थः। भ्राजृ दीप्तौ इत्येतस्य वा भर्गः तेजः इत्यर्थः। **देवस्य** इति षष्ट्यैकवचनं दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-स्वप्न-मदमोद-कान्ति-गतिषु इत्येतस्य घातोः एतद्रूपं दीव्यतेः क्रीडनत्वात् विजिगीषुत्वाद् व्यवहारत्वात् द्युतित्वात् स्तुतित्वात् स्वप्नत्वात् सुमदद्वात् मोदकत्वात् सुकान्तित्वात् गतित्वात् ज्ञानत्वात् प्राप्यत्वात् वा देवस्य। **धीमहि** ध्यै चिन्तायां यः असौ आदित्यः हिरण्मयः पुरुषः, सः असौ अहम् इति चिन्तयामः। **धियः** द्वितीयबहुवचनम्। **यः** छान्दसत्वात् लिङ्गव्यत्ययः। यत्तेजः सूर्यमण्डलाभिधेयं वरेण्यं श्रेष्ठं भर्गः पापभञ्जनहेतुभूतं, तत् **नः** अस्माकं धियः बुद्धीः श्रेयस्करेषु कर्मसु **प्रचोदयात्**। चुद प्रेरणे धातुः प्रेरयेत् इत्यर्थः। इति भारद्वाजीयधर्मशास्त्रे व्याख्या स्मर्तव्या "अहः अहः द्विजैः" इति।

**आपः** उदकं ब्रह्म इति उच्यते। "आपः वा" इति श्रुतेः। **ज्योतिः** इति ज्योतिर्मयं, **रसः** इति सारात्मकं (रसात्मकं) कैवल्यम् आत्मतत्त्वं तद्ब्रह्म एव आनन्दपदं तत्किं **भूर्भुवःस्वरोम्** इत्येव अक्षररूपं पञ्चवर्णात्मकमयम् एव पञ्चाक्षरीमन्त्रः प्रणवादिः प्रणवान्तः वा इति अथर्वाङ्गिरससूत्रम्॥

---

[10] महः इत्यस्य अर्थः लुप्तः

## ब्रह्मपुराणम्

भूः इति भूर्लोकः। भुवः इति अन्तरिक्षम्। स्वः इति स्वर्लोकः। तत् इति तेजः। तेजसः अग्निर्देवता। सवितुः इति सविता आदित्यो यो यः। वरेण्यं वरेण्यम् इति अन्नं वरेणियम् अन्नम् एव प्रजापतिः। भर्गः इति आपो वै भर्गः। यत् आपः तत्सर्वा देवता। देवस्य इति यः वै देवा वः पुरुषः सः विष्णुः। धिमहि इति ऐश्वर्यं तदैश्वर्यं तन्महेश्वरः। धियः इति सः प्राणः अयं वायुः। यः इति अध्यात्मं तत्परमं यः। नः इति पृथिवी। इयं योनिः। प्रचोदयात् इति कामं कामयेम् इदं लोकं लोकाः प्रत्याचक्षते॥

## स्कन्दपुराणम्

यो नोऽस्माकं धियश्चिन्तान्यन्तर्यामि स्वरूपतः।
प्रचोदयात् प्रेरयेच्च तस्य देवस्य सुव्रताः॥

दीप्तस्य सर्वजन्तूनां प्रत्यक्षस्य स्वभावतः।
**सवितुः** स्वात्मभूतं तु **वरेण्यं** सर्वजन्तुभिः॥

स्वमाया शक्तिसंभिन्नं शिवरुद्रादिसंज्ञितम्।
आदित्यदेवतायास्तु प्रेरकं परमेश्वरम्॥

आदित्येन परिज्ञातं वयं **धीमह्यु**पास्महे।
सावित्र्यः कथितो ह्यर्थः संग्राहेण मयादरात्॥

## विष्णुधर्मोत्तरपुराणम्

कर्मेन्द्रियाणि पञ्चैव पञ्चबुद्धीन्द्रियाणि च।
पञ्च बुद्धीन्द्रियार्थाश्च भूतानां चैव पञ्चकम्॥

मनोबुद्धिस्तथैवात्मा अव्यक्तश्च यदुत्तमम्।
चतुर्विंशति एतानि गायत्र्या अक्षराणि च।
प्रणवं पुरुषं विद्धि सर्वाङ्गं पञ्चविंशकम्॥

# अप्पय्यदीक्षितभाष्यम् आदित्यस्तोत्ररत्नवृत्तौ

[11] आदित्यस्तोत्ररत्नस्य वृत्तिर्गूढप्रकाशिका।
अस्माभिरेव क्रियते नातिसङ्कोचविस्तरा॥

---

आदित्ये मण्डलार्चिः पुरुषविभिदयाऽऽद्यन्तमध्यागमात्मनि
आगोपालाङ्गनाभ्यो नयनपथजुषा ज्योतिषा दीप्यमानम्।
गायत्रीमन्त्रसेव्यं निखिलजनधियां प्रेरकं चित्स्वरूपम्
नीलग्रीवं त्रिनेत्रं शिवम् अनिशम् उमावल्लभं संश्रयामि॥ १२

---



वृत्तिः॥ अथ “आदित्यो वा एष एतन्मण्डलम्” इत्यादिप्रकारेण उक्तं “असौ यस्ताम्रो अरुणः” इत्यादिमन्त्रोक्तं च अस्य महिमानम् आविष्कर्तुं, अस्य गायत्र्युपास्यत्वं च दर्शयितुं द्वादशः श्लोकः **आदित्ये मण्डलार्चिः** इति। “आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचः स ऋचां मण्डलं स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चीषि पुरुषस्तानि यजूंषि स यजूषां मण्डलं स यजूषां लोकः सैषा त्रय्येव विद्या तपति” इति यन्मण्डलार्चिःपुरुषाणाम् ऋग्वेदसामवेदयजुर्वेदात्मकत्वम् उक्तं, तत् आद्यन्तमध्यागमात्मनि इत्यन्तेन अनूदितम्। आद्यागमः आदिवेदः ऋग्वेदः। मध्यमवेदः यजुर्वेदः। अन्तिमवेदः सामवेदः। अतः एव आद्यवेदस्य आद्याक्षरं “अग्निमीळे” इति अकारः। मध्यवेदस्य मध्याक्षरं “योनीः समुद्रो बन्धुः” इति उकारः। अन्तिमवेदस्य अन्तिमाक्षरं “समानं परम्” इति मकारः। एवं त्रिभिः एतैः अक्षरैः त्रयीसारप्रणवस्य निष्पत्तिः इति अभियुक्ता। “असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः” इति मन्त्रोक्तसर्वभूतदृश्यत्वं विसृत्वरविग्रहतेजोद्वारेण न तु स्वविग्रहेण एव इति तदर्थः द्वितीयपादेन अनूदितः। मन्त्रे उदहार्यः इति प्रातः जलम् आहरन्त्यः स्त्रियः उक्ताः॥

---

[11] वृत्तिः स्तोत्ररचयित्रा एव कल्पिता। अयं द्वादशः स्तोत्रस्य अन्तिमः श्लोकः।

गायत्रीमन्त्रसेव्यम् इति गायत्र्यर्थतया तदुपास्यत्वम् उक्तम्। गायत्र्यर्थः च भर्गशब्दयोगात्। भर्गशब्दस्य प्रथमान्तस्य, तृतीयपादे यच्छब्दविशेष्यसम्पर्कतया अन्वयः[12]।

“यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः।
अर्थतो ह्यसमर्थानाम् आनन्तर्यम् अकारणम्॥”

इति वार्तिककारवचनात्, “अर्थतो ह्यसमर्थानाम् आनन्तर्येऽप्यसम्बन्धः” इति विश्वजिदधिकरणे जैमिनिना सूत्रित्वात् च। न च भर्गः इति प्रथमान्तशब्दस्य, वरेण्यम् इत्यस्य द्वितीयान्तस्य विशेष्यता कथञ्चित् कल्पनीया इति वाच्यम्। तत्पदस्य विशेष्यस्य सद्भावात्।

“ॐ तत् सत् इति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः”

इति तस्य ब्रह्मवाचकत्वश्रवणात्। न च तस्य यत्पदप्रतिनिर्देशार्थतया ब्रह्मवाचकत्वं न युक्तम् इति शङ्क्यम्। उत्तरवाक्यगतयत्पदस्य तन्निर्देशकपदान्तरवति पूर्ववाक्ये तत्पदानपेक्षत्वस्य व्युत्पत्तिसिद्धत्वात्। लोकवेदयोः तथैव प्रयोगदर्शनात्। तस्मात् भर्गः इत्यस्य पूर्ववाक्ये तावत् न सम्बन्धः॥

उत्तरवाक्ये च तत्सम्बन्धः अवश्यम् अपेक्षितः, यत्पदस्य विशेष्यसा(ता?)काङ्क्षात्। न च पूर्ववाक्यगतब्रह्मवाचकं तत्पदं तद्विशेष्यं स्यात् इति वाच्यम्, पुंल्लिङ्गस्य यत्पदस्य प्रथमं पुल्लिङ्गविशेष्यान्वयं विना तत्पदसामानाधिकरण्यायोगात्। अतः भर्गशब्दस्य उत्तरवाक्ये एव अन्वयः। तथा च योगयाज्ञवल्क्यस्मृतिः –

“देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात्।
प्रचोदयात् तत् वरेण्यं धीमहीत्यन्वयक्रमात्॥” इति॥

[12] यः भर्गः (शिवः) इति अन्वयः॥



यदि च भर्गपदस्य पूर्ववाक्ये एव सम्बन्धः तदाऽपि अस्य अकारान्ततया शिववाचकस्य एव “व्यत्ययो बहुलम्” इति छान्दसेन विभक्तिव्यत्ययेन “द्वितीयार्थे प्रथमा” इति प्रथमान्तता कल्पनीया। एवं “सुपां सुलुक्” इत्यादिसूत्रेण द्वितीयायाः छान्दसस्वादेशः इति द्वितीयान्तता च उपपादनीया। न च भर्गशब्दः अयं सकारान्तः इति कल्पनीयः, तथा सति द्वितीयान्तत्वं ऋजुमार्गेण उपपद्यते इति वाच्यम् – प्रातिपदिकस्य अकारान्तत्वेन रूढ्यपरित्यागे सम्भवति सकारान्तत्वं परिकल्प्य तस्य यौगिकार्थान्तरान्वेषणक्लेशायोगात्।

“एष रुद्रो भर्गाख्यो ब्रह्मवादिनः” इति मैत्रायणीयश्रुतौ,
“भर्गमयो द्वितीयो द्वितीयः पादः” इति तलवकारश्रुतौ,
“आदित्यान्तर्गतं यं च भर्गाख्यं वै मुमुक्षुभिः” इति योगयाज्ञवल्क्यस्मृतौ,
“तत् भर्गाख्यं किमपि परं धाम सोऽहं प्रपद्ये” इति साम्बस्तुतौ,

गायत्रीगतस्य भर्गः इत्यस्य अनुवाददर्शनात् च। सकारान्तत्वकल्पनेऽपि अकारान्तरूढ्यनुसारेण शिवस्य एव तदर्थतया प्राप्तेः। “त्मना सहस्रपोषिणं चक्षोः सूर्योजायत सर्वं प्रोक्तं त्रिविधं ब्रह्मम् एतत्” इत्यादिवाक्येषु “त्मनां चक्षोः ब्रह्मम्” इत्यादिपदानां छान्दसेन वर्णलोपविकारेण आत्मादीनां प्रसिद्धार्थानम् एव ग्रहणात्। तस्मात् भर्गः इत्येतदनुसारेण गायत्रीमन्त्रः शिवपरः इति शिवस्य तदुपास्यत्वसिद्धिः॥

किञ्च सकलजनधियां प्रेरकः सर्वान्तर्यामी शिवः एव इति ततोऽपि तस्य तत्सिद्धिः। सर्वान्तर्यामी शिवः एव – “यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीम् अन्तरो यमयति” इत्यादिषु पृथिव्यादिषु पर्यायेषु सर्वेषु अपि “एष त आत्मान्तर्यामी अमृतः” इति अमृतशब्दश्रवणात्। अमृतशब्दस्य जाबालोपनिषदि “किं जप्येनामृतत्वं ब्रूहि” इति ब्रह्मचारिणां प्रश्नोत्तरे “शतरुद्रीयेणेति एतानि ह वा अमृतस्य नामधेयानि” इति याज्ञवल्क्यवाक्ये शिवनाम्नाम् अमृतनामत्वोक्त्या शिवनामत्वावधारणात्॥

अपि च अन्तर्यामिणः शिवस्य पृथिव्यादिसर्वशरीरकत्वम् अवगमयति। “विश्वरूपं यतस्तस्य विश्वरूपः शिवः स्मृतः” इति महाभारते च शिवे विश्वरूपनामनिर्वचनम् अपि तत् अवगमयति। तस्मात् शिवः एव गायत्रीमन्त्रोपास्यः॥

तत्तु कूर्मपुराणे वसुमनसे राज्ञे गायत्र्याः भगवन्तम् आदित्यं बहुकालम् उपासितवते वरं दातुम् उपास्यस्य प्रथमं हिरण्यगर्भरूपेण ततः शिवरूपेण च आविर्भाववचनम्, तत् गायत्र्याः सवितुः अन्तर्यामी शिवः उपासितः इति सवितुः अपि विशेषणतया उपास्यकोटिप्रवेशात् सवितुः च हिरण्यगर्भरूपत्वात् उपपन्नम्॥

चतुर्थपादे निलग्रीवम् इत्यनेन “असौ योऽवसर्पति नीलग्रीवो विलोहितः” इति मन्त्रभागार्थः अनुसंहितः। उमावल्लभम् इत्यनेन “आदित्यो वा एष एतन्मण्डलं तपति” इत्यादिप्रकरणावसाने श्रुतस्य “नमो हिरण्यपतये अम्बिकापतये उमापयते नमो नमः” इति मन्त्रभगस्य अर्थः अनुसंहितः।

“एष रुद्रो महादेवः कपर्दी च घृणी हरः।
आदित्यो भगवान् सूर्यो नीलग्रीवस्त्रिलोचनः।
अधीयते सहस्रांशुः सामगाध्वर्युहोतृभिः॥”

इत्यादिपुराणवचनार्थः त्रिणेत्रम् इत्यनेन अनुसंहितः इत्यादि सर्वम् अनवद्यम्॥

## अप्पय्यदीक्षितभाष्यं शिखरिणीमालायाम्

[13]चिन्मुद्राकृतमुद्रपाणिनिलयं चित्ते शिवं कुर्महे।
येन केनाप्युपायेन शिवे चित्तं निवेशयेत्॥

---

द्विजानां गायत्री खलु परमुपास्या नियमिता
प्रसिद्धस्तस्याश्च त्वमसि भगवन् दैवतम् इति।
अकुर्वाणस्यातस्तव वरणसेवां द्विजपशोख-

---

13 व्याख्या स्तोत्रलेखकेन एव रचिता

विषमविवृतिः नाम शिवतत्त्वविवेकव्याख्यानं --

त्रैवर्णिकानां सर्वेषां गायत्री परमा गतिः।
कर्मान्तरेष्वशक्तोऽपि तयैव लभते गतिम्॥ १

तां विनाऽन्यानि कर्माणि निष्फलानि कृतान्यपि।
अस्मिन्नर्थे न कस्यापि वैदिकस्य विसम्मतिः॥ २

सन्ध्याहीनोऽशुचिर्नित्यम् अनर्हः सर्वकर्मसु।
तदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत्॥ ३

परिहाय्यापि वेदांस्त्रीन् कर्माणि विहितानि च।
गायत्रीमात्रम् आश्रित्य द्विजो भवति निर्भयः॥ ४

गायत्रीहीनवेदास्तु साङ्गा अपि च निष्फलाः।
इत्यादिस्मृतिवाक्यानाम् ऐकमत्यस्य दर्शनात्॥ ५

अमुष्या प्रतिपाद्या च देवता श्रीसदाशिवः।
असाधारण-तत्रत्य-भर्गशब्देन निश्चितः॥ ६



यदेष रुद्रो भर्गाख्यो ब्रह्मवादिन इत्यदः।
वाक्यमैत्रायणीयानां गायत्र्यर्थनिरूपणे॥ ७

या च भर्गमयत्वोक्तिः श्रुतौ तलवकारिणाम्।
तत्पादस्य द्वितीयस्य ताभ्याम् अर्थात्तु संगतात्॥ ८

आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः।
भर्गाख्यं किम् अपीत्यादिव्यवहाराच्च तद्विदाम्॥ ९

प्रथमात्र द्वितीयार्थे छन्दसि व्यत्ययस्मृतेः।
भूयः सृष्ट्वा पतय इत्यत्र प्रथमा यथा॥ १०

यद्वा "सुपांसुलुक्" सूत्रादमः स्वादेशकल्पनात्।
स्याद्द्वितीयान्त एवायं प्रथमान्तो न कल्पते॥ ११

अथवा प्रथमान्तत्वात् स्वस्थानानन्वयी भवेत्।
तृतीयपादम् आगत्य विशेषस्यार्थकस्त्वयम्॥ १२

नन्वेवं सति तच्छब्दे न घटेत नपुंसकम्।
तवापि यत्पदे पुंस्त्वं न युज्यते कथञ्चन॥ १३

युक्तं सवितृवृत्तित्वे तस्य पुंलिङ्गतेति चेत्।
तदेव तावत् तस्येह न युक्तम् इति मन्महे॥ १४

सविता हि किमादित्यः किं वा ब्रह्मादिकारणम्।
न ब्रह्मा नहि तस्यापि वरेण्यं तेज इष्यते॥ १५

सवितुर्भर्ग इत्येवम् अन्वयोभ्युपगम्यताम्।
ब्रह्मणो ज्योतिरितेवम् अथोभेदोपचारवान्॥ १६

मैवं वरेण्यम् इत्येतत्पदं सन्निधिवर्त्ति च।
क्लृप्तस्वान् वयम् अन्यत्र प्रतिसम्बन्ध्यपेक्षि च॥ १७

अतः सवितृशब्दोयं न तदुल्लङ्घ्य केनचित्।
शक्येत संयोजयितुम् अपि पङ्कजयोनिना॥ १८

श्वेताश्वतरशाखयाम् अनयोस्तावदन्वयः।
तदक्षरं तत्सवितुर्वरेण्यम् इति निश्चितम्॥ १९

अपि मैत्रायणीयानां शाखायाम् अन्वयोऽनयोः।
विस्पष्टम् एतत् सवितुर्वरेण्यमिति विश्रुतः॥ २०

तथा च मन्त्रे सवितुर्वरेण्यमिति याजुषे।
प्रसिद्धः प्रतिबुद्धानाम् अनयोरन्यः स्फुटम्॥ २१

शब्दार्थप्रत्यभिज्ञानगायत्र्यार्थानुबन्धिषु।
एतेषु श्रुतिवाक्येषु "भर्ग" शब्दो न पठ्यते॥ २२

तद् एतेष्वनयोरेव निश्चितेन्योन्यम् अन्वये।
ऐकार्थ्यादनयोरेव युक्तोत्राऽपि समन्वयः॥ २३

एवं सवितृशब्दस्य न ब्रह्मार्थ इति स्थिते।
सहस्रकिरणो देवः प्रसिद्धोर्थोवसीयते॥ २४

आदित्यमण्डलाइसिनं रुक्माभं पुरुषं परम्।
ध्यायं जपेत् तदित्येतन्निष्कामो मुच्यते द्विजः॥ २५

आदित्यमण्डलान्तस्थं परं ब्रह्मादिदैवतम्।
छन्दो निवृत्स्याद्गायत्री मया दृष्टा सनातनी॥ २६

इत्यादिस्मृतिवचनैः मौरमण्डलमध्यगम्।
गायत्र्या दैवतं ब्रह्मेत्येतत् तावद्विनिश्चितम्॥ २७

न तत्सवितृशब्दस्य जगत्स्रसवितृत्वतः।
ब्रह्मण्येव प्रवृत्तत्वे कथञ्चिदपि लभ्यते॥ २८

तस्यादित्यपरत्वे तु येन सूर्य इति "श्रुतम्"।
तस्य तेजः प्रदत्वेन वरेण्यं मण्डलस्थितम्॥ २९

तदन्तर्यामिभावेन छन्दोगादिश्रुतिश्रुतम्।
तच्छब्दाभिहितं ब्रह्म देवतेति प्रसिध्यति॥ ३०

एष देवो महादेवः केवलः परमः शिवः।
तदेवाक्षराम् अद्वैतं तदादित्यान्तरं परम्॥ ३१

इति कौर्मे तत्सवितुर्वरेण्यम् इति महतः।
भावो हि वासरमणेरन्तर्यामिणि योजितः॥ ३२

एवं च यद्भरद्वाजः सावित्र्या देवतां रविम्।
उवाच तच्च युज्यते स्वान्निर्मूलं तदन्यथा॥ ३३

विश्वामित्र ऋषिः छन्दो गायत्री देवता रविः।
इति स ह्यस्मरद्विष्णोराचार्यो भगवान् ऋषिः॥ ३४

सवितुर्भर्ग इत्येवम् अन्वयाङ्गीकृतावपि।
सूर्ये सवितृशब्दस्य वृत्तिर्वाच्योदितैर्नयैः॥ ३५

एवं सवितृशब्दस्य सहस्रांशुरिति स्थिते।
तत्रासङ्कुचितास्मद्धीप्रेरकत्वम् अनन्वयि॥ ३६

तद्वरेण्यं परं ब्रह्म तन्मण्डलगतं शिवम्।
भर्ग इत्युदितं ज्योतिः श्रूयते तत्पदोदितम्॥ ३७

तवं तवापि यच्छब्दे न युज्यते नपुंसकम्।
तस्मात् क्वचिद्भवत्येषा तुल्यलिङ्गान्यथाकृतिः॥ ३८

वस्तुतस्तु तवैवायं भवेद्दोषोन्वयक्रमे।
तच्छब्दलिङ्गाघटनं नैवास्त्यस्माकम् अन्वये॥ ३९

यच्छब्दप्रतिनिर्देशो नायं तच्छब्द इष्यते।
श्रुतस्योत्तरवाक्यस्य पूर्वं तदनपेक्षणात्॥ ४०

अलङ्कारेषु सर्वेषु तथैव प्रतिपादनात्।
तथैव लोके वेदे च वाक्यानाम् अपि दर्शनात्॥ ४१

किन्तु ध्यानक्रियकर्मभूतस्य परमात्मनः।
नामैतत्तच्च गीतासु सुप्रसिद्धं नपुंसकम्॥ ४२

स्ववाक्यप्रतिनिर्देशवाक्येनाश्रयबोधनम्।
भर्गशब्दम् अपेक्ष्यात्र पुल्लिङ्गम् अपि युज्यते॥ ४३

एवं श्रुत्यन्तरं स्मर्तृवाक्यजातानुरोधतः।
क्वापि लिङ्गायथाभावदोषवैकल्यतोपि च॥ ४४

अजन्तत्वेन निर्णीतात् भर्गशब्दान्महेशितुः।
वाचकात् प्रतिपाद्योऽसौ गायत्र्या इति मीयते॥ ४५

आदित्याश्रयणीयत्वादपि लिङ्गादिति स्फुटम्।
गायत्र्याः प्रतिपाद्योऽसौ शिव इत्यवसीयते॥ ४६

तत्तस्यान्तर्यामिनि स्याद्यद्वा तस्याधिदैवते।
द्वेधाप्यसाधारण्येन पर्यवस्येन्महेश्वरे॥ ४७

भास्करस्येश्वरो देव इत्यादिस्मृतिदर्शनात्।
सिद्धं तदधिदैवत्वं तदन्तर्यामितोदिता॥ ४८



तदेवं श्रुतिलिङ्गाभ्यां श्रुत्यन्तरबलादपि।
गायत्र्याः प्रतिपाद्योऽर्थः परः शम्भुरिति स्थिते॥ ४९

देवस्य द्योतनात् तस्य निधित्वात् द्युतिसम्पदाम्।
रवेस्तेजःपदं ब्रह्म ध्यायेमस्तत्पदोदितम्॥ ५०

यद्भर्गसंज्ञम् अस्माकं धियः कर्मानुसारतः।
प्रेरयन्तन्तरात्मत्वादिति मन्त्रान्वयक्रमः॥ ५१

स्याच्चेत् सवितृशब्दस्य भर्गशब्देन योजना।
तस्याप्युत्तरवाक्ये स्यात् तद्वदेव निवेशनम्॥ ५२

देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात्।
प्रचोदयात् तं वरेण्यं धीमहीत्यन्वयक्रमः॥ याज्ञवल्क्यः स्मृ॰

इत्यसौ याज्ञवल्क्येन सर्वशास्त्रार्थवेदिना।
स्वनिर्मिते योगशास्त्रे दर्शितो मुनिनान्वयः॥ ५४

भर्गशब्दात् पर्स्यामः स्वादेशस्य तु कल्पने।
स्वस्थान एव स भवेद् विभक्तिव्यत्ययस्य वा॥ ५५

नन्वेवं सति केषाञ्चिदृषीनाम् इह धीमताम्।
भर्ग इत्यस्य सान्तत्वव्यवहारस्य का गतिः॥ ५६

नहि सान्तोयम् इत्येतद् उक्तम् अस्मिन् स्मृतौ क्वचित्।
प्रयोगो भर्ग इत्येष नेतुं शक्यः स्वमूलवत्॥ ५७

दृश्यते स्मृतिवाक्येषु ह्यागमार्थानुवादिषु।
यथा श्रुतानुवादोपि व्याख्येयस्य सतोन्यथा॥ ५८

[14] न तत्र सूर्यो भातीति मन्त्रोयं हि यथा श्रुतः।
अनूदितः पुराणेषु व्याख्यातव्योऽन्यथापि सन्॥ ५९

यस्मिन्न भासते विद्युन्नैष सूर्यो च चन्द्रमाः।
यस्य भासा विभातीदम् इत्येषा शाश्वती श्रुतिः॥ ६०

ये विभक्तिव्यत्ययेन यच्छब्देनान्वयेन वा।
व्यवहारास्तस्य दृष्टास्तेर्थगत्यावलम्बिनः॥ ६१

स्मृतीनां वेदतात्पर्यव्याखानपदवीजुषाम्
अर्थगत्यवलम्बो हि श्रेयान् शब्दावलम्बनात्॥ ६२

अत एव न तत्रेति मन्त्रो भगवता स्वयम्।
न तद्भासयते सूर्यो न शशाङ्को न पावकः॥ ६३

---

[14] “न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयम् अग्निः। तम् एव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति” इति श्रुतिवचनम्॥

इत्यर्थम् अवलम्ब्यैवानुक्तौ हित्वा यथा श्रुतम्।
चक्षोः सूर्य इति श्रौतः पुराणे वैष्णवो मनुः॥ ६४

अक्ष्णः सूर्योनिलः प्राणादित्यनूक्तोर्थवीक्षया।
इत्येवं स्मृतिकाराणां व्यवहाराः समञ्जसाः॥ ६५

सर्वस्तवैवाकारान्तव्यवहारो विरुध्यते।
न हि भर्गाख्यम् इत्यादिव्यवहारः कथञ्चन॥ ६६

भर्ग इत्यस्य सान्तत्वपक्षेर्हति स्मर्थनम्।
अस्तु वा सान्त एवायं यथाप्यर्थोस्य शङ्करः॥ ६७

तद्वाचकपदस्यैव विकारः छान्दसो ह्ययम्।
किञ्चिद्वर्णविकारेऽपि बहुसारूप्यदर्शने॥ ६८

व्यवस्थितं पूर्वतन्त्रे पदैक्यं लोकवेदयोः।
चक्षोः सूर्यो ब्रह्मम् एतद् इत्यादौ विश्रुतात्पदम्।
लिङ्गवर्णाविकारेऽपि बिन्नवन्नाभ्युपेयते॥ ६९

यदि सान्तस्य शब्दस्य रूढिः स्याद्वस्तुनि क्वचित्।
तदा ह्यजन्तसारूप्यं भवेदैक्यं प्रयोजकम्॥ ७०

सरं शब्दादिव सरः शब्दोभिन्नो भवेदयम्।
सास्य क्लृप्ता क्वचिदपि नेष्यते लोकवेदयोः॥ ७१

नन्वस्य रुऊढ्यभावेऽपि योगेनान्यत्र वर्त्तनम्।
भवत्येव च वृद्धैश्च बहुधा संप्रदर्शितम्॥ ७२

भक्तस्नेहाद्भ्राग्यदानाद्र्जनाद्भ्रञ्जनाद्भृतेः।
भाभृञिधात्वोर्व्युत्पत्त्या दीप्तिरूपत्वतोऽपि च॥ ७३

मैवं न वर्णविकृतिम् अनाश्रित्यैव वैदिकीम्।
उपपादयितुं शक्या योगाः सर्वे प्रदर्शिताः॥ ७४

तदाश्रये विकारोयं रूढस्यैवेति युज्यते।
रुढेर्योगाद्बलीयस्त्वं यतः सर्वैरुरीकृतम्॥ ७५

नन्वेषु यत्र योगे स्यादाञ्जसा रूप्यम् अस्तु सः।
विकारकल्पनाद्भूतौ स एव खलु युज्यते॥ ७६

सत्यं तथाऽपि मन्त्रस्य व्याख्याने ब्राह्मणे त्वयम्।
अजन्तो नुदित इति प्रागस्माभिरुदाहृतम्॥ ७७

अतः कल्प्यावश्यम् एव छान्दसी विकृतिः क्वचित्।
सान्तेजन्तेथवा मन्त्रब्राह्मणैः कार्यसिद्धये॥ ७८

कल्प्यते सान्त एवैषा अजन्ते रूढिलाभतः।
रूढशब्देन विवृतेराञ्जस्या देववाचिना॥ ७९

एवं च स्मृतिकाराणां व्यवहारोऽपि युज्यते।
अर्थानुसारतोऽजन्त सान्तशब्दानुसारतः॥ ८०

पक्षान्तरे तवकारान्तव्यवहारो न युज्यते।
न ह्यसौ शब्दम् अर्थं वा व्याख्येयस्य निरीक्ष्यते॥ ८१

तस्मात् सकारान्तत्वेऽपि शिवस्यैवैष वाचकः।
छान्दसेन विकारेण तच्छक्तेरपरिक्षयात्॥ ८२

यो देवः सवितास्माकं धियो धर्मादिगोचराः।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यम् उपास्महे॥ ८३

देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात्।
भर्गो वरेण्यं तद् ब्रह्म धीमहीत्यर्थ उच्यते॥ ८४

इत्येवमादिकस्मर्तृवचः स्वारस्यलाभतः।
विधान्तरेण गायत्र्या मन्वते येन्वयक्रमम्॥ ८५

तन्मतेऽपि शिवादन्यं नास्याः सिध्यति दैवतम्।
भर्गश्रुतेश्च सवितुर्वरेण्यत्वस्य चान्वयात्॥ ८६

कैश्चित् सवितृशब्दस्य ब्रह्मवेदार्थ इष्यते।
सर्वान्तर्यामिता लिङ्गात् तथाप्यस्मन्मतं दृढम्॥ ८७

स्थापितं चैतद् आदित्यपुराणे रविणा स्फुटम्।
गायत्र्याः शिवमन्त्रत्वम् इच्छं न्यायोपबृंहितम्॥ ८८

ततो दर्भासने स्थित्वा गायत्रीं प्रजपेद् द्विजः।
गायत्र्याः परमं तत्त्वं देवदेवो महेश्वरः॥ ८९

इति ज्ञात्वा जपेद् विद्वान् गायत्र्याः फलम् अश्नुते।
यो ह्यन्यथा हि मनुते गायत्रीं शिवरूपिणीम्॥ ९०

स पच्यते महाघोरे नरके कल्पसङ्ख्यया।
तथा कौर्मे पुराणेऽपि विष्णुना कौर्मरूपिणा॥ ९१

स्वयं प्रदर्शिता शम्भोर्गायत्री प्रतिपाद्यते।
एवं हि श्रूयते तत्र राजवंशानुकीर्त्तने॥ ९२

राजा वसुमना नाम रविमण्डलमध्यगम्।
समुपासीष्ट गायत्र्या पुरुषं रुक्मविग्रहम्॥ ९३

अनुग्रहार्थम् अस्याथ भगवान् परमः शिवः।
आविर्भूय रवेर्बिम्बादस्मै रूपम् अदर्शयत्॥ ९४

शिवशक्तिमयं दिव्यं चन्द्रार्धकृतशेखरम्।
त्रिलोचनं नीलकण्ठं ब्रह्मोपेन्द्रादिवन्दितम्॥ ९५

अनुगृह्य च तत्कालं देहान्तेदान्निजं पदम्।
तुष्टश्चिरतरं तस्य गायत्र्याराधनादिति॥ ९६

अत्र केचन मुह्यन्ते विष्णुसंज्ञम् इति श्रुतेः।
काचिद् वरेण्यं सवितुर्भर्गे विष्णुभिधाऽसौ॥ ९७

ततश्च विष्णुरेवार्थो गायत्र्या इति तल्लघु।
तस्य रुद्रत्वबाधिन्याम् अपि सत्यां कुतो ह्ययम्॥ ९८

निर्णयः स्यान्न्यायदृष्टौ शिव एवेति निर्णयः।
शिवेऽपि विष्णुसंज्ञायाः शिखायाम् अनुशासनात्॥ ९९

शिवतत्त्वादिभूम्यन्तं शरीरादि घटादि च।
व्याप्याधितिष्ठति शिवस्तस्माद्विष्णुरुदाहृतः॥ १००

भगवान् भगसद्भावान्निर्मलत्वाच्छिवः स्मृतः।
स्वामी स्वमस्य यत्सर्वं विष्णुः सर्वप्रवेशनात्॥ १०१

इति तत्र निरुक्तेश्च तस्या वायूक्तिलैङ्गयोः।
तन्नामा एकमध्ये च गणनादागमादिषु॥ १०२

श्रुत्यन्तरेषु गायत्री प्रतिपाद्ये प्रयुक्तयोः।
मुख्यत्वासम्भवाद्विष्णौ शिवरुद्राभिधानयोः॥ १०३

विद्यमाने विवरणे यन्त्रलिङ्गाविरोधिनि।
तद्विरुद्धार्थनिष्ठस्य दौर्बल्याच्चेति सिध्यति॥ १०४

नन्वाश्वमेधके कृष्णवचनं पाण्डवं प्रति।
तन्मण्डलस्थं मा ध्यायेत् तेजोमूर्तिं चतुर्भुजम्॥ १०५


उदुत्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि।
गायत्रीं च यथाशक्ति जप्त्वा सूक्तं च मामकम्॥ १०६

इति गायत्र्युपास्यत्वं दर्शयन्त्यसुरद्विषः।
मैवं सन्ध्यासु भगवद्भक्तैर्भास्करमण्डले॥ १०७

उपास्या भगवन् मूर्तिरितेतावत्परं वचः।
न तु गायत्र्युपास्यत्वपर्यन्ता स्थापनं समम्॥ १०८
नहि श्रुतिविरुद्धेर्थे तात्पर्यं तस्य युज्यते॥

## शाङ्कराभाष्यम्

[15] **यः** सविता **देवः नः अस्माकं धियः** कर्माणि धर्मादि-विषयाः वा बुद्धीः **प्रचोदयात्** प्रेरयेत्, **तत्** तस्य सर्वासु श्रुतिषु प्रसिद्धस्य **देवस्य** द्योतमानस्य, **सवितुः** सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य आत्मभूतं **वरेण्यं** सर्वैः उपास्यतया ज्ञेयतया च संभजनीयं, **भर्गः** अविद्यातत्कार्ययोः भर्जनात् भर्गः स्वयंज्योतिः
परब्रह्मात्मकं तेजः, **धीमहि** तद्योऽहं सोऽसौ योऽसौ सोऽहम् इति वयं ध्यायेम॥ १



यद्वा **तदिति भर्गो** विशेषणम्, **सवितुः देवस्य तत्** तादृशं **भर्गः धीमहि**, किम् तत् इति अवेक्षायां आह -- यः इति लिङ्गस्य प्रत्ययः य**द्भर्गः धियः प्रचोदयात्** इति तत् ध्यायेम इति समन्वयः॥

यद्वा **यः** सविता सूर्यः, **धियः** कर्माणि **प्रचोदयात्** प्रेरयति, नः तस्य **सवितुः** सर्वस्य प्रसवितुः **देवस्य** द्योतमानस्य सूर्यस्य, तत्सर्वैः दृश्यतया प्रसिद्धं, **वरेण्यं** सर्वैः सम्भजनीयम्। **भर्गः** पापानां तापक तेजोमण्डलं, **धीमहि**

---

[15] आदिशङ्कराचार्यस्य भाष्यम् इति केषाञ्चन एव मतम्। भाष्यस्योपरि गद्यात्मकं, पद्यात्मकं च विवरणे वर्तेते, ये पुस्तकेऽस्मिन् अप्रकाशिते॥

ध्यायेम, मनसा धारयेम॥ ३

यद्वा **भर्ग**श्शब्देन अत्र अन्नम् अभिधीयते **यः सविता देवः धियः प्रचोदयति** तस्य प्रसादात् **भर्गः** अन्नादिलक्षणं फलं **धीमहि** धारयामः तस्य आधारभूता भवेम इत्यर्थः॥ ४

अथ सर्वदेवात्मनः सर्वशक्तेः सर्वावभासक तेजोमयस्य परमात्मनः सर्वात्मकत्व प्रतिपादकगायत्री महामन्त्रस्य उपासनाप्रकारः प्रकाश्यते। तत्र गायत्रीं प्रणवादि सप्तव्याहृत्युपेतां शिरः समेतां सर्ववेदसारम् इति वदन्ति, एवं विशिष्टादगायत्री प्राणायामैः उपास्या॥ ५

न प्रणवव्याहृतित्रयेवेता, प्रणवास्ता गायत्रीजपादिभिः उपास्या तत्र शुद्धगायत्री प्रत्यग् ब्रह्मैक्यप्रबोधिका **धियो यो नः प्रचोदयाद्** इति। **नः** अस्माकं **धियः** बुद्धिः **यः प्रचोदयात्** प्रेरयेत् इति सर्वबुद्धि संज्ञान्तःकरणप्रकाशक सर्वसाक्षी प्रत्यगात्मा इति उच्यते। तस्य **प्रचोदया**द्धद्धनिर्दिष्टस्य आत्मनः स्वरूपभूतं परं ब्रह्म **तत्सवितुः** इत्यादिपदैः निर्दिश्यते। तत्र ॐ तत्सत् इति निर्देशः ब्रह्मणः त्रिविधः स्मृतः इति तद्बद्धेन प्रत्यग्भूतस्वतः सिद्धं परं ब्रह्म उच्यते। **सवितुः** इति सृष्टिस्थितिलक्षणकस्य सर्वप्रपञ्चस्य समस्तद्वैतविभ्रमस्य अधिष्ठानं लक्षयते। **वरेण्यम्** इति सर्ववरणीयं निरतिशयानन्दरूपं **भर्गः**, इति अविद्यादोषभर्जनात्मकज्ञानैकविषयत्वं, **देवस्य** इति सर्वद्योतनात्मकाखण्ड सदेकरसं **सवितुः देवस्य** इति। अत्र षष्ठ्यर्थः राहोः शिरवत् औपचारिकः बुद्ध्यादिसर्वदृश्यसाक्षिलक्षणं यन्मे स्वरूपं तत् सर्वाधिष्ठानरूपं परमानन्दं निरस्तसमस्तानर्थरूपं स्वप्रकाशचिदात्मकं ब्रह्म इति एनं **धीमहि** ध्यायेम॥ ६

सप्तव्याहृतीनाम् अयमर्थः -- **भूः** इति सन्मात्रम् उच्यते। **भुवः** इति सर्वं भावं प्रकाशयतीति व्युत्पत्त्या चिद्रूपम् उच्यते। **सुवः** इति सुव्रियते इति व्युत्पत्त्या सुवः इति सुष्ठु सर्वैः व्रियमाण-सुख-स्वरूपम् उच्यते। **महः** इति महीयते पूज्यते इति व्युत्पत्त्या सर्वातिशयत्वम् उच्यते। **जनः** इति जनयतीति जननकारणत्वम् उच्यते। **तपः** इति सर्वतेजो-रूपत्वं **सत्यम्** इति सर्वबाधारहितत्वम्॥

एतत् उक्तं भवति, लोके स्वरूपं तदोङ्कार वाच्यं ब्रह्मैव आत्मनः अस्य सच्चिद्रूपस्वभावादिति। अथ भूरादयः सर्वेलोकाः ॐकारवाच्याः ब्रह्मात्मकाः न तद्यतिरिक्तं किञ्चिद् अस्तीति व्याहृतयः सर्वात्मक ब्रह्मबोधकाः॥ ७

गायत्री शिरसोऽपि अयम् एव अर्थः। **आपः** इति आप्नोतीति व्युत्पत्त्या व्यापकत्वम् उच्यते। **ज्योति**रिति प्रकाशरूपत्वं, **रसः** इति सर्वातिशयत्वम्। **अमृतमि**ति मरणादि-संसार-निर्मुक्तत्वम्। सर्वव्यापि-सर्वप्रकाशकत्वं सर्वोत्कृष्ट-नित्य-मुक्तत्वम् आत्मरूपं सच्चिदानन्दात्मकं यदोङ्कार-वाच्यं **ब्रह्म** तद् अहम् अस्मीति गायत्री मन्त्रस्यार्थः॥ ८

गुहाशये ब्रह्महुताशनेऽहंकर्त्रिदमंशाख्य हविर्हुतम् सत्।
विलीयते नेदम् अहं भवानित्येष प्रकारस्त्वभिधीयतेऽत्र॥ १

यदस्ति यद्भाति तदात्मरूपं नान्यत् ततो भाति न चान्यदस्ति।
स्वभाव संवित् प्रतिभाति केवला ग्राह्यं ग्रहीतेति मृषैव कल्पना॥ २

# श्रुतिभाष्यम्

## शाङ्करभाष्यं छान्दोग्योपनिषदि




यत एवम् अतिशयफलैषा ब्रह्मविद्या, अतः सा प्रकारान्तरेणापि वक्तव्या इति “गायत्री वा” इत्याद्यारभ्यते। गायत्री-द्वारेन च उच्यते ब्रह्म, सर्वविशेष-रहितस्य “नेति नेति” इत्यादि-विशेष-प्रतिषेध-गम्यस्य दुर्बोधत्वात्। सत्सु अनेकेषु छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात्। सोमाहरणात् इतरच्छन्दोक्षराहरणेन इतरच्छन्दोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं

गायत्र्याः। गायत्रीसारत्वाच्च ब्राह्मणस्य मातरम् इव, हित्वा गुरुतरां गायत्रीं ततोऽयद् गुरुतरं न प्रतिपद्यते यथोक्तं प्रह्मापीति। तस्याम् अत्यन्तगौरवस्य प्रसिद्धत्वात्। अतो गायत्रीमुखेनैव ब्रह्मोच्यते --

---

गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च॥ १

---

**गायत्री वा** इत्यवधारणार्थो वै-शब्दः। **इदं सर्वं भूतं** प्राणिजातं **यत्किञ्च** स्थावरं जङ्गमं वा तत्सर्वं गायत्र्येव। तस्याः छन्दोमात्रायाः सर्वभूतत्वम् अनुपपन्नम् इति गायत्रीकारणं वाचं शब्दरूपाम् आपादयति गायत्रीं **वाग्वै गायत्री** इति। **वाग्वा इदं सर्वं भूतम्**। यस्माद् वाक् शब्दरूपा सती सर्वं भूतं गायति शब्दयति - असौ गौः असावश्व इति च, त्रायते च रक्षति - अमुष्मान्मा भैषीः किं ते भयम् उत्थितम् इत्यादिना सर्वतो भयान्निवर्त्यमानः वाचा त्रातः स्यात्। यद् वाक् भूतं **गायति च त्रायते च**, गायत्र्येव तद् गायति च त्रायते च, वाचः अनन्यत्वाद् गायत्र्याः। गानात् त्राणाच्च गायत्र्या गायत्रीत्वम्॥

---

या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्याम् हीदं सर्वं भूतं प्रतिष्ठितम् एताम् एव नातिशीयते॥ २

---

**या वै सा** एवं लक्षणा सर्वभूतरूपा **गायत्री**, **इयं वाव सा येयं पृथिवी**। कथं पुनः इयं पृथिवी गायत्री इति, उच्यते -- सर्वभूतसम्बन्धात्। कथं सर्वभूतसम्बन्धः, **अस्यां** पृथिव्यां **हि** यस्मात् **सर्वं** स्थावरं जङ्गमं च **भूतं प्रतिष्ठितम्**, **एताम् एव** पृथिवीं **नातिशीयते** नातिवर्तते इत्येतत्। यथा गानत्राणाभ्यां भूतसम्बन्धः गायत्र्याः, एवं भूतप्रतिष्ठानाद् भूतसम्बद्ध पृथिव्यतः गायत्री पृथिवी॥

---

या वै सा पृथिवीयं वाव सा यद् इदम् अस्मिन् पुरुषे शरीरम् अस्मिन् हीमे प्राणाः प्रतिष्ठिता एतद् एव नातिशीयन्ते॥ ३

---

**या वै सा पृथिवी** गायत्री **इयं वाव सा** इदम् एव। तत्किम्? **यद् इदम् अस्मिन् पुरुषे** कार्य(क)कारणसङ्घाते जीवति **शरीरं**, पार्थिवत्वात् शरीरस्य। कथं शरीरस्य

गायत्रीत्वम् इति, उच्यते **-- अस्मिन् हि इमे प्राणाः** भूतशब्दवाच्याः **प्रतिष्ठिताः**। अतः पृथिवीवद् भूतशब्दवाच्यप्राणप्रतिष्ठानात् शरीरं गायत्री। **एतद् एव** यस्मात् शरीरं **नातिशीयन्ते** प्राणाः॥

---

यद् वै तत्पुरुषे शरीरम् इदं वाव तद् यद् इदम् अस्मिन् अन्तः पुरुषे हृदयम्
अस्मिन् हीमे प्राणाः प्रतिष्ठिता एतद् एव नातिशीयन्ते॥ ४

---

**यद् वै तत्पुरुषे शरीरं** गायत्री **इदं वाव तत्**। **यद् इदम् अस्मिन् अन्तः** मध्ये **पुरुषे हृदये** पुण्डरीकाख्यम् एतद् गायत्री। कथम् इति, आह **-- अस्मिन् हि इमे प्राणाः प्रतिष्ठिताः**, अतः शरीरवद् गायत्री हृदयम्। **एतद् एव** च **नातिशीयन्ते** प्राणाः। "प्राणो ह पिता। प्राणो माता" इति, "अहिंसन् सर्वभूतानि" इति च श्रुतेः भूतशब्दवाच्याः प्राणाः॥



---

सैषा चतुष्पदा षड्विधा गायत्री तद् एतद् ऋचाऽभ्यनूकम्॥

---

**सैषा चतुष्पदा** षडक्षरपदा छन्दोरूपा सती भवति गायत्री **षड्विधा --** वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती षड्विधा भवति। वाक्प्राणयोः अन्यार्थनिर्दिष्टयोः अपि **गायत्री**प्रकारत्वम्। अन्यथा षड्विधसंख्यापूरणानुपपत्तेः। तद् एतस्मिन् अर्थे एतद् गायत्र्याख्यं ब्रह्म गायत्र्यनुगतं गायत्रीमुखेन उक्तम् **ऋचा**ऽपि मन्त्रेण **अभ्यनूक्तं** प्रकाशितम्॥

---

तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपाद्
अस्यामृतं दिवीति॥ ६

---

**तावान् अस्य** गायत्र्याख्यस्य ब्रह्मणः समस्तस्य **महिमा** विभूतिविस्तारः। यावांश्चतुष्पात् षड्विधश्च ब्रह्मणो विकारः पादो गायत्री इति व्याख्यातः। अतः तस्माद् विकारलक्षणाद् गायत्र्याख्याद् वाचारम्भणमात्रात् **ततो ज्यायान्** महत्तरश्च परमार्थसत्यरूपोऽविकारः **पूरुषः** पुरुषः सर्वपूरणात् पुरि शयनाच्च। तस्य **अस्य पादः**

**सर्वाः** सर्वाणि **भूतानि** तेजोबन्नादीनि सस्थावरजङ्गमानि। **त्रिपात्** त्रयः पादाः **अस्य** सोऽयं त्रिपात्। त्रिपाद् **अमृतं** पुरुषाख्यं समस्तस्य गायत्र्यात्मनो **दिवि** द्योतनवति स्वात्मनि अवस्थितम् इत्यर्थः इति॥

---

यद् वै तद् ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा
पुरुषाद् आकाशो यो वै स बहिर्ध पुरुषाद् आकाशः॥ ७

---

यद् वै तत् त्रिपाद् अमृतं गायत्रीमुखेन उक्तं ब्रह्म इति इदं वाद तद् इदम् एव। तद्योऽयं प्रसिद्धो बहिः पुरुषाद् आकाशो भौतिको यो वै सः बहिर्धा पुरुषाद् आकाश उक्तः॥

---

अयं वाव स योऽयम् अन्तः पुरुष
आकाशो यो वै सोऽन्तः पुरुष आकाशः॥ ८

---


अयं वाव सः योऽयम् अन्तः पुरुषे शरीर आकाशः यो वै सोऽन्तः पुरुश आकाशः॥

---

अयं वाव योऽयम् अन्तर्हृदय आकाशस्तद् एतत् पूर्णम् अप्रवर्ति
पूर्णाम् अप्रवर्तिनीं श्रियं लभते य एवं वेद॥ ९

---

अयं वाव सः योऽयम् अन्तर्हृदये हृदयपुण्डरीक आकाशः। कथम् एकस्य सत आकाशस्य त्रिधा भेद इति। उच्यते -- बाह्येन्द्रियविषये जागरितस्थाने नभसि दुःखबाहुल्यं दृश्यते। ततोऽन्तःशरीरे स्वप्नस्थानभूते मन्दतरं दुःखं भवति स्वप्नान् पश्यतः। हृदयस्थे पुनः नभसि न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति। अतः सर्वदुःखनिवृत्तिरूपम् आकाशं सुषुप्तस्थानम्। अतो युक्तम् एकस्यापि त्रिधा भेदान्वाख्यानम्। बहिर्धा पुरुषाद् आरभ्य आकाशस्य हृदये सङ्कोचकरणं



चेतःसमाधानस्थानस्तुतये। यथा “त्रयाणाम् अपि लोकानां कुरुक्षेत्रं विशिष्यते। अर्धतस्तु कुरुक्षेत्रम् अर्धतस्तु कुरुक्षेत्रम् अर्धतस्तु पृथूदकम्” इति तद्वत्। तद् एतद्धार्दाकाशाख्यं ब्रह्म पूर्णं सर्वगतं न हृदयमात्रपरिच्छिन्नम् इति मन्तव्यम्। यद्यपि हृदयाकाशे चेतः समाधीयतेऽप्रवर्ति न कुतश्चित् क्वचित् प्रवर्तितुं शीलम् अस्येत्यप्रवर्ति तद् अनुच्छित्तिधर्मकम्। यथाऽन्यानि भूतानि परिच्छिन्नानि उच्छित्तिधर्मकाणि न तथा हार्दं नभः। पूर्णाम् अप्रवर्तिनीम् अनुच्छेदात्मिकां श्रियं विभूतिं गुणफलं लभये दृष्टं यः एवं यथोक्तं पूर्णाप्रवर्तिगुणं ब्रह्म वेद जानातीहैव जीवंस्तद्भावं प्रतिपद्यत इत्यर्थः॥

इति च्छान्दोग्योपनिषच्छाङ्करभाष्ये तृतीयाध्यायस्य द्वादशः खण्डः

## गायत्र्योपनिषत् गोपथब्राह्मणस्था

स ह मैत्रेयः प्रातः समित्पाणिः मौद्गल्यम् उपससाद ॰ तं ह उपेत्य पप्रच्छ

(१)किं स्विद् आहुः भोः **सवितुः वरेण्यं** ?

(२) **भर्गो देवस्य** कवयः किम् आहुः ?

(३) **धियो** विचक्ष्व यदि ताः प्रवेस्य प्रचोदयांत् सविता याभिः एतीति॥

तस्मा एतत् प्रोवाच --

(१) वेदाः छन्दांसि **सवितुः वरेण्यम्**

(२) **भर्गो देवस्य** कवयो ऽन्नम् आहुः॥

(३) कर्माणि **धियः** तद् उ ते ब्रवीमि प्रचोदयांत् सविता याभिः एतीति॥

### *कः सविता? का सावित्री?*

तम् उपसंगृह्य पप्रच्छ -- अधीहि भोः, कः सविता? का सावित्री?

(मन) एव सविता (वाक्) सावित्री सः

यत्र ह्येव (मनः) तद् (वाक्); यत्र वै (वाक्) तन् (मन);

इत्येते द्वे योनी, एकं मिथुनम्॥

(अग्निः) एव सविता (पृथिवी) सावित्री, यत्र ◦ मिथुनम्॥
(वायु) एव सविता (अन्तरिक्षं) सावित्री, यत्र ◦ मिथुनम्॥
(आदित्य) एव सविता (द्यौः) सावित्री, यत्र ◦ मिथुनम्॥
(चन्द्रमा) एव सविता (नक्षत्राणि) सावित्री, यत्र ◦ मिथुनम्॥
(अहः) एव सविता (रात्रिः) सावित्री, यत्र ◦ मिथुनम्॥
(उष्णम्) एव सविता (शीतं) सावित्री, यत्र ◦ मिथुनम्॥
(अभ्रम्) एव सविता (वर्षं) सावित्री, यत्र ◦ मिथुनम्॥
(विद्युद्) एव सविता (स्तनयित्नुः) सावित्री, यत्र ◦ मिथुनम्॥
(प्राण) एव सविता (अन्नं) सावित्री, यत्र ◦ मिथुनम्॥
(वेदा) एव सविता (छन्दांसि) सावित्री, यत्र ◦ मिथुनम्॥
(यज्ञ) एव सविता (दक्षिणा) सावित्री, यत्र ◦ मिथुनम्॥

एतद् ह स्म एतद् विद्वांसम् ओपाकारिमासस्तुः ब्रह्मचारी ते संस्थित इति अथैत आसस्तुराचित इव चितो बभूवाथोत्स्याय प्राव्राजीद् इति एतद् वाहं वेद नैतासु योनिषु इत एतेभ्यो वा मिथुनेभ्यः सम्भूतो ब्रह्मचारी मम पुरायुषः प्रेयाद् इति॥ ३३

## *प्रथमपादार्थः*

ब्रह्म हेदं श्रियं प्रतिष्ठाम् आयतनम् ऐक्षत तत् तपस्व, यदि तद् व्रते ध्रियेत तत् सत्ये प्रत्यतिष्ठत्, स सविता सावित्र्या ब्राह्मणं सृष्ट्वा, तत्सावित्रीं पर्यदधात्, **तत्सवितुर्वरेण्यम्** इति सावित्र्याः प्रथमः पादः, पृथिव्यर्चं समदधाद् ऋचाग्निम् अग्निना श्रियं, श्रिया स्त्रियं, स्त्रिया मिथुनं, मिथुनेन प्रजां, प्रजया कर्म, कर्मणा तपः, तपसा सत्यं, सत्येन ब्रह्म, ब्रह्मणा ब्राह्मणं, ब्राह्मणेन व्रतं, व्रतेन वै ब्राह्मणः संशितो भवति अशून्यो भवति अविच्छिन्नो भवति अविच्छिन्नो ऽस्य तन्तुः अविच्छिन्नं जीवनं भवनं भवति, य एवं वेद यश्चैवं विद्वान् एवम् एतं सावित्र्याः प्रथमं पादं व्याचष्टे॥ ३४

## *द्वितीयपादार्थः*

**भर्गो देवस्य धीमही**ति सावित्र्या द्वितीयः पादो ऽन्तरिक्षेण यजुः समदधात् यजुषा वायुं, वायुना अभ्रम्, अभ्रेण वर्षं, वर्षेण ओषधिवनस्पतीन्,

ओषधिवनस्पतिभिः पशून्, पशुभिः कर्म, कर्मणा तपः, तपसा सत्यं, सत्येन ब्रह्म, ब्रह्मणा ब्राह्मणं, ब्राह्मणेन व्रतं, व्रतेन वै ब्राह्मणः संशितो भवति अशून्यो भवति अविच्छिन्नो भवति अविच्छिन्नो ऽस्य तन्तुः अविच्छिन्नं जीवनं भवति य एवं वेद यस्चैवं विद्वान् एवम् एतं सावित्र्या द्वितीयं पादं व्याचष्टे॥ ३५

## *तृतीयपादार्थः*

**धियो यो नः प्रचोदयाद्** इति सावित्र्याः तृतीयः पादो दिवा साम समदधात् साम्नादित्यम्, आदित्येन रश्मीन्, रश्मिभिः वर्षं, वर्षेण ओषधिवनस्पतीन्, ओषधिवनस्पतिभिः पशून्, पशुभिः कर्म, कर्मणा तपः, तपसा सत्यं, सत्येन ब्रह्म, ब्रह्मणा ब्राह्मणं, ब्राह्मणेन व्रतं, व्रतेन वै ब्राह्मणः संशितो भवति अशून्यो भवति अविच्छिन्नो भवइत् अविच्छिन्नो ऽस्य तन्तुः अविच्छिन्नं जीवनं भवति य एवं वेद यश्चैवं विद्वान् एवम् एतं सावित्र्याः तृतीयं पादं व्याचष्टे॥ ३६

तेन ह वा एवं विदुषा ब्राह्मणेन ब्रह्माभिपन्नं ग्रसितं परामृष्टं,
ब्रह्मणाऽऽकाशम् अभिपन्नं ग्रसितं परामृष्टम्,
आकाशेन वायुः अभिपन्नो ग्रसितः परामृष्टो,
वायुना ज्योतिः अभिपन्नं ग्रसितं परामृष्टं,
ज्योतिषा आपो अभिपन्ना ग्रसिताः परामृष्टा,
अद्भिः भूमिः अभिपन्ना ग्रसिता परामृष्टा,
भूम्या अन्नम् अभिपन्नं ग्रसितं परामृष्टम्,
अन्नेन प्राणो ऽभिपन्नो ग्रसितः परामृष्टः,
प्राणेन मनो ऽभिपन्नं ग्रसितं परामृष्टं,
मनसा वाग् अभिपन्ना ग्रसिता परामृष्टा,
वाचा वेदा अभिपन्ना ग्रसिताः परामृष्टा,
वेदैः यज्ञो ऽभिपन्नो ग्रसितः परामृष्टः,

तानि ह वा एतानि द्वादशमहाभूतानि एवं विधिप्रतिष्ठितानि तेषां यज्ञ एव परार्ध्यः॥ ३७

ते ह स्म एतम् एवं विद्वांसो मन्यन्ते विद्म एनम् इति याथातथ्यम् अविद्वांसो ऽयं यज्ञो वेदेषु प्रतिष्ठितो,

वेदा वाचि प्रतिष्ठिता,

वाङ् मनसि प्रतिष्ठिता,

मनः प्राणे प्रतिष्ठितम्,

प्राणो ऽन्ने प्रतिष्ठितः,

अन्नं भूमौ प्रतिष्ठितम्,

भूमिः अप्सु प्रतिष्ठिता,

आपो ज्योतिषि प्रतिष्ठिता,

ज्योतिः वायौ प्रतिष्ठितम्,

वायुः आकाशे प्रतिष्ठितः,

आकाशं ब्रह्मणि प्रतिष्ठितम्,

ब्रह्म ब्राह्मणे ब्रह्मविदि प्रतिष्ठितम्,

यो ह वा एवंवित् स ब्रह्मवित् पुण्यां च कीर्तिं लभते,

सुरभींश्च गन्धान् सो ऽपहतपाप्मानन्त्यश्रियम् अश्नुते,

य एवं वेद यश्चैवं विद्वान् एवम् एतां वेदानां मातरं **सावित्री**सम्पदम् उपनिषदम् उपास्त इति ब्राह्मणम्॥ ३८

कः सविता, का सावित्री? [अग्निः] एव सविता, [पृथिवी] सावित्री सः यत्र [अग्निः] तत् [पृथिवी], यत्र वा [पृथिवी] तत्र [अग्निः] ते द्वे योनिः, तत् एकं मिथुनम्॥ कः सविता, का सावित्री? वरुणः एव सविता, आपः सावित्री, सः यत्र ॰ मिथुनम्॥ कः सविता, का सावित्री? वायुः एव सविता, आकाशः सावित्रीः, सः यत्र ॰ मिथुनम्॥ कः सविता, का सावित्री? यज्ञः एव सविता, छन्दांसि सावित्री, सः यत्र ॰ मिथुनम्॥ कः सविता, का सावित्री? स्तनयित्नुः एव सविता, विद्युत् सावित्री, सः यत्र ॰ मिथुनम्॥ कः सविता, का सावित्री? आदित्यः एव सविता, द्यौः सावित्री, सः यत्र ॰ मिथुनम्॥ कः सविता, का सावित्री? चन्द्रः एव सविता, नक्षत्राणि सावित्री, स यत्र ॰ मिथुनम्॥ सः सविता, का सावित्री? मनः एव सविता, वाक् सावित्री, सः यत्र ॰ मिथुनम्॥ कः सविता, का सावित्री? पुरुषः एव सविता, स्त्री सावित्री, सः यत्र [पुरुषः] तत् [स्त्री], यत्र वा [स्त्री] तत् [पुरुषः], ते द्वे योनिः, तत् एकं मिथुनम्॥ १-९

उपनीषद्ब्रह्मयोगिनः भाष्यम् –

सावित्र्युपनिषद्वेद्यचित्सावित्रपदोज्ज्वमल्।
प्रतियोगिविनिर्मुक्तरामचन्द्रपदं भजे॥

इह खलु सामवेदप्रविभक्ता इयं सावित्र्युपनिषत् सवितृसावित्रीनवमिथुनबलातिबलामहामनुप्रकटनव्यग्रा तद्गतहेयांशापायसिद्धनिर्विशेषब्रह्मणि पर्यवसनाविजयते। अस्याः श्रुतेः संक्षेपतः विवरणम् आरभ्यते। श्रुतिः एव शिवशक्तिस्वरूपं किम् इति आशङ्क्य अवान्तररूपेण स्वयम् एव प्रकाशायति – **कः** इति। “सविता प्राणिनः सूते” इति श्रुत्यनुरोधेन यदज्ञानतः स्वाज्ञदृष्ट्या स्वाविद्यापदतत्कार्यजातं सूतं प्रसूतम् आविर्भूतं तत्र एव स्थितं तिरोभूतं च भवति, यः स्वज्ञदृष्ट्या स्वाज्ञविकल्पितप्रपञ्चारोपापवादाधारः भवति, यः परमार्थदृष्ट्या स्वाज्ञस्वज्ञविक्लपितारोपापवादापह्नवसिद्धः सन् निष्प्रतियोगिकतया स्वमात्रम् अवशिष्यते, सोऽयं **सविता** परमेश्वरः परमात्मा कीदृशः, यया विद्यया सविता प्रकाशते सा इयं **सावित्री** कीदृशी इति श्रुतिः स्वयम् एव आशङ्क्य स्वाज्ञबुद्ध्यारोहाय तयोः स्वरूपं प्रकटयति – **अग्निः** इति।

अग्न्यादिपुरुषान्तम् एव **सविता**, अग्न्यादिपुरुषान्तगतनामरूपादिविशेषांशापाये तत्रत्यसच्चिदानन्दस्वरूपस्य निष्प्रतियोगिकचिन्मात्रसवितृरूपत्वात्। **पृथिव्यादिः** त्र्यन्तं **सावित्री**, तत्रत्यजडाविद्यांशापायसिद्धाजडविद्यायाः स्वाज्ञविकल्पितस्वातिरिक्तकलनाऽपह्नवसिद्धं ब्रह्म विष्प्रतियोगिकस्वमात्रम् इति बोधकत्वात्। तयोः वाच्यवाचकलक्ष्यलक्षणबोध्यबोधकभावं कथम् इति अत्र आह – **सः** इति। **सः यत्र अग्न्या**दिपुरुषान्तानुस्यूतः सविता विराजते, **तत्र पृथिव्या**दिस्त्र्यन्तानुस्यूतरूपिणी **सावित्री**, पुनः व्यतिहारेण **यत्र पृथिव्या**दिः **तत्र अग्न्या**दिः। **ते द्वे योनिः तत् एकं मिथुनम्** इति नवकृत्वोपदेशः, तयोः सवितृसावित्र्योः मिथः कार्यकारणत्वं वाच्यवाचकत्वं लक्ष्यलक्षणत्वं बोध्यबोधकत्वं च उपपद्यते इति अर्थः॥ १-९

---

तस्याः एष प्रथमः पादो भूस्तत्सवितुर्वरेण्यम् इत्यग्निर्वै वरेण्यम् आपो वरेण्यं चन्द्रमा वरेण्यम्॥ तस्याः एष द्वितीयः पादो भर्गमयो भुवो भर्गो देवस्य धीमहीत्यग्निर्वै भर्ग आदित्यो वै भर्गश्चन्द्रमा वै भर्गः॥ तस्या एष तृतीयः पादः स्वर्धियो यो नः प्रचोदयादिति स्त्री चैव पुरुषश्च प्रजनयतः॥ १२

---

उक्तनवकृत्वोपदेशः सावित्र्याः प्रथमः पादः भवति इत्याह – **तस्या** इति। कः सविता इत्यादिनवकृत्वोपदेशः सावित्र्याः **प्रथमः पादः** विज्ञेयः। तत्सवितुः यद्वरेण्यं तदग्न्यापश्चन्द्रादिगतहेयांशापायसिद्धं तत् सावित्र्याः द्वितीयः पादः भवति॥ १०

भूरित्याद्यव्याहृतिस्वरूपम् उक्त्वा अथ **भर्गमयो भुवो भर्गो देवस्य धीमहि** इति भुव इति व्याहृत्यात्मकं देवस्य यद्भर्गः तेजः चिन्मात्रज्योतिः स्वमात्रम् इति धीमहि, तदग्न्यादित्यचन्द्रगतहेयांशापायसिद्धं भर्गः॥ ११

**तस्या एष तृतीयः पादः स्वरि**ति व्याहृत्यात्मकं सावित्रं **ब्रह्म यन्नो** अस्माकं **धियः** सर्वापह्नवसिद्धं ब्रह्म विष्प्रतियोगिकस्वमात्रम् इति सम्यक् ज्ञाने **प्रचोदयात्**। तदतिरेकेण स्त्रीपुंरूपेण प्रविभक्तप्रपञ्चः नास्ति एव। यदि अस्ति इति भ्रान्तिः तदा सर्वत्र सवितृसावित्र्यौ स्त्रीपुमादिविशिष्टप्रपञ्चं जनयतः उत्पादयतः॥ यतः एवं, अतः

तयोः सवितृप्रपञ्चयोः कार्यकारणभावः सम्पद्यते, कारणातिरेकेण कार्याभावात् कार्यापाये कारणस्य कार्यकारणकलनाविरलब्रह्ममात्रत्वात्॥ १२

---

योे वा एतां सावित्रीमेवं वेद स पुनर्मृत्युं जयति॥ १३

---

एवं वेदनफलम् आह – **यः** इति। यः वै मुनिः **एतां** चिन्मात्रसवितृबोधिनीं **सावित्रीं** विद्यां जानाति **सो**ऽयं मुनिः ब्रह्मनिष्ठाप्रमादरूपमृत्युं **जयति** अप्रमादेन ब्रह्मनिष्ठाम् अर्हति इत्यर्थः॥ १३

## मैत्रेयण्युपनिषदि गायत्र्यर्थः

**तत्सवितुर्वरेण्यम्** इति असौ वा आदित्यः सविता सः वा एवं प्रवरणाय आत्मकामेन इत्याहुः ब्रह्मवादिनः अथ **भर्गो देवस्य धीमहि** इति सविता वै ते अवस्थिता योऽस्य **भर्गः** कं सञ्चितयामि इत्याहुः ब्रह्मवादिनः अथ **धियो यो नः प्रचोदयात्** इति बुद्धयः वै **धियः** ताः योऽस्माकं प्रचोदयादित्याहुर्ब्रह्मवादिनोऽथ भर्ग इति यो ह वा अस्मिन्नादित्ये निहितस्तारकेऽक्षिणि चैष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गो भर्जति वैष भर्ग इति ब्रह्मवादिनोऽथ भर्ग इति भासयतीमाँल्लोकानिति रञ्जयतीमानि भूतानि गच्छत इति गच्छत्यस्मिन्नागच्छत्यस्मा इमाः प्रजास्तस्माद्भारकत्वाद्भर्गः शत्रून्सूयमानत्वात्सूर्यः सन्नात्सविता दानादादित्यः पवनात्पावमानोऽथायोऽथायनादादित्य इत्येवं ह्याह खल्वात्मनात्मामृताख्यश्चेता मन्ता गन्ता स्रष्टा नन्दयिता कर्ता वक्ता रसयिता घ्राता स्पर्शयिता च विभुविग्रहे सन्निष्ठा इत्येवं ह्याहाथ यत्र द्वैतीभूतं विज्ञानं तत्र हि शृणोति पश्यति जिघ्रतीति रसयते चैव स्पर्शयति सर्वमात्मा जानीतेति यत्राद्वैतीभूतं विज्ञानं कार्यकारणनिर्मुक्तं निर्वचनमनौपम्यं निरुपाख्यं किं तदङ्ग वाच्यम्॥ ५-७

एष हि खल्वात्मेशानः शंभुर्भवो रुद्रः प्रजापतिर्विश्वसृड्ढिरण्यगर्भः सत्यं प्राणो हंसः शान्तो विष्णुर्नारायणोऽर्कः सविता धाता सम्राडिन्द्र इन्दुरिति य एष तपत्यग्निना पिहितः सहस्राक्षेण हिरण्मयेनानन्देनैष वाव विजिज्ञासितव्योऽन्वेष्टव्यः सर्वभूतेभ्योऽभयं दत्त्वारण्यं गत्वाथ बहिःकृतेन्द्रियार्थान्स्वशरीरादुपलभतेऽथैनमिति

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् . सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः॥ ५-८

द्विधा वा एष आत्मानं बिभर्त्ययं यः प्राणो यश्चासा आदित्योऽथ द्वौ वा एता अस्य पन्थाना अन्तर्बहिश्चाहोरात्रेणैतौ व्यावर्तेते असौ वा आदित्यो बहिरात्मान्तरात्मा प्राणोऽतो बहिरात्मक्या गत्यान्तरात्मनोऽनुमीयते गतिरित्येवं हि आहाथ यः कश्चिद्विद्वानपहतपाप्माऽक्षाध्यक्षोऽवदातमनास्तन्निष्ठ आवृत्तचक्षुः सो अन्तरात्मक्या गत्या बहिरात्मनोऽनुमीयते गतिरित्येवं ह आह अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो यः पश्यतीमां हिरण्यवस्थात् स एषोऽन्तरे हृत्पुष्कर एवाश्रितोऽन्नमत्ति॥ ६-१

अथ य एषोऽन्तरे हृत्पुष्कर एवाश्रितोऽन्नमत्ति स एषोऽग्निर्दिवि श्रितः सौरः कालाख्योऽदृश्यः सर्वभूतान्यन्नमत्तीति कः पुष्करः किंमयो वेति इअदं वा व तत्पुष्करं योऽयमाकाशोऽस्येमाः चतस्रो दिशश्चतस्र उपदिशो दलसंस्था आसमर्वाग्विचरत एतौ प्राणादित्या एता उपासितोमित्येतदक्षरेण व्याहृतिभिः सावित्र्या चेति॥ ६-२

द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च . अथ यन्मूर्तं तदसत्यम् यदमूर्तं तत्सत्यम् तद्ब्रह्म तज्ज्योतिः यज्ज्योतिः स आदित्यः स वा एष ओमित्येतदात्माभवत् स त्रेधात्मानं व्याकुरुत ओमिति तिस्रो मात्रा एताभिः सर्वमिदमोतं प्रोतं चैवास्मीति एवं ह्याहैतद्वा आदित्य ओमित्येवं ध्यायत आत्मानं युञ्जीतेति॥ ६-३

अथान्यत्रापि उक्तमथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति असौ वा आदित्य उद्गीथ एष प्रणवा इति . एवं ह्याहोद्गीथं प्रणवाख्यं प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं त्रिपदं त्र्यक्षरं पुनः पञ्चधा ज्ञेयं निहितं गुहायामित्येवं ह्याहोर्ध्वमूलं त्रिपाद्ब्रह्म शाखा आकाश वाय्वग्न्युदकभूम्यादय एकोऽश्वत्थनामैतद्ब्रह्मैतस्यैतत्तेजो यदसा आदित्यः ओमित्येतदक्षरस्य चैतत्तस्मादोमित्यनेनैतदुपासीताजस्रमित्येकोऽस्य सम्बोधयितेत्येवं ह्याह -- एतदेवाक्षरं पुण्यमेतदेवाक्षरं परम् . एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥ ६-४

अथान्यत्राप्युक्तं स्वनवत्येषास्यस्तनुर्या ओमिति स्त्रीपुंनपुंसकेति लिङ्गवती एषाऽथाग्निर्वायुरादित्य इति भास्वति एषा अथ ब्रह्म रुद्रो विष्णुरित्यधिपतिवती

एषाऽथ गार्हपत्यो दक्षिणाग्निराहवनीया इति मुखवती एषाऽथ ऋग्यजुःसामेति विज्ञानवती एषा भूर्भुवःस्वरिति लोकवती एषाऽथ भूतं भव्यं भविष्यदिति कालवती एषाऽथ प्राणोऽग्निः सूर्य इति प्रतापवती एषाऽथान्नमापश्चन्द्रमा इत्याप्यायनवती एषाऽथ बुद्धिर्मनोऽहङ्कारा इति चेतनवती एषाऽथ प्राणोऽपानो व्यान इति प्राणवती एषेति अत ओमित्युक्तेनैताः प्रस्तुता अर्चिता अर्पिता भवन्तीति एवं ह्याहैतद्वै सत्यकाम परां चापरां च ब्रह्म यदोमित्येतदक्षरमिति॥ ६-५

अथाव्याहृतं वा इदमासीत् स सत्यं प्रजापतिस्तपस्तप्त्वाऽनुव्याहरद्भूर्भुवःस्वरिति . एषैवास्य प्रजापतेः स्थविष्ठा तनुर्या लोकवतीति स्वरित्यस्याः शिरो नाभिर्भुवो भूः पादा आदित्यश्चक्षुः चक्षुरायता हि पुरुषस्य महती मात्रा चक्षुषा ह्ययं मात्राश्चरति सत्यं वै चक्षुः अक्षिण्यवस्थितो हि पुरुषः सर्वार्थेषु चरति एतस्माद्भूर्भुवःस्वरित्युपासीतानेन हि प्रजापतिर्विश्वात्मा विश्वचक्षुरिवोपासितो भवतीति एवं ह्याहैषा वै प्रजापतेर्विश्वभृत्तनुरेतस्यामिदं सर्वमन्तर्हितमस्मिन् च सर्वस्मिन्नेषा अन्तर्हितेति तस्मादेषोपासीता॥ ६-६

तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः सविता स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिनोऽथ भर्गो देवस्य धीमहीति सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं चिन्तयामीत्याहुर्ब्रह्मवादिनोऽथ धियो यो नः प्रचोदयादिति बुद्धयो वै धियस्तायोऽस्माकं प्रचोदयादित्याहुर्ब्रह्मवादिनः अथ भर्गा इति यो ह वा अमुष्मिन्नादित्ये निहितस्तारकोऽक्षिणि वैष भर्गाख्यः भाभिर्गतिरस्य हीति भर्गः भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिनोऽथ भ इति भासयतीमान् लोकान् र इति रंजयतीमानि भूतानि ग इति गच्छन्त्यस्मिन्नागच्छन्त्यस्मादिमाः प्रजास्तस्माद्भ\-रग\-त्वाद्भर्गः शाश्वत् सूयमानात् सूर्यः सवनात् सविताऽदानात् आदित्यः पवनात्पावनोऽथापोप्यायनादित्येवं ह्याह खल्वात्मनोऽत्मा नेतामृताख्यश्चेता मन्ता गन्तोत्सृष्टानन्दयिता कर्ता वक्ता रसयिता घ्राता द्रष्टा श्रोता स्पृशति च विभुर्विग्रहे सन्निविष्टा इत्येवं ह्याह अथ यत्र द्वैतीभूतं विज्ञानं तत्र हि शृणोति पश्यति जिघ्रति रसयति चैव स्पर्शयति सर्वमात्मा जानीतेति यत्राद्वैतीभूतं विज्ञानं कार्यकारणकर्मनिर्मुक्तं निर्वचनमनौपम्यं निरुपाख्यां किं तदवाच्यम्॥ ६-७

एष हि खल्वात्मेशानः शम्भुर्भवो रुद्रः प्रजापतिर्विश्वसृक् हिरण्यगर्भः सत्यं प्राणो हंसः शास्ता विष्णुर्नारायणोऽर्कः सविता धाता विधाता सम्राडिन्द्र इन्दुरिति य एष तपत्यग्निरिवाग्निना पिहितः सहस्राक्षेण हिरण्मयेनाण्डेन एष वा जिज्ञासितव्योऽन्वेष्टव्यः सर्वभूतेभ्योऽभयं दत्वारण्यं गत्वाथ बहिःकृत्वेएन्द्रियार्थान्स्वाच्छरीरादुपलभेत एनमिति . विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् . सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः॥ ६-८

तस्माद्वा एष उभयात्मैवं विदात्मन्येवाभिद्यायत्यात्मन्येव यजतीति ध्यानं प्रयोगस्थं मनो विद्वद्भिष्टुतं मनःपूतिमुच्छिष्टोपहतमित्यनेन तत्पावयेत् मन्त्रं पठति उच्छिष्टोच्छिष्टोपहितं यच्च पापेन दत्तं मृतसूतकाद्वा वसोः पवित्रमग्निः सवितुश्च रश्मयः पुनन्त्वन्नं मम दुष्कृतं च यदन्यत् अद्भिः पुरस्तात्परिदधाति प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहेति पञ्चभिरभिजुहोति अथावाशिष्टं यतवागश्नात्यतोऽद्भिर्भूय एवोपरिष्टात्परिदधात्याचान्तो भूत्वात्मेज्यानः प्राणोऽग्निर्विश्वोऽसीति च द्वाभ्यामात्मानमभिध्यायेत् प्राणोऽग्निः परमात्मा वै पञ्चवायुः समाश्रितः स प्रीतः प्रीणातु विश्वं विश्वभुक् विश्वोऽसि वैश्वानरोऽसि विश्वं त्वया धार्यते जायमानम् विशन्तु त्वामाहुतयश्च सर्वाः प्रजास्तत्र यत्र विश्वामृतोऽसीति एवं न विधिना खल्वनेनात्तानत्वं पुनरुपैति॥ ६-९

अथापरं वेदितव्यमुत्तरो विकारोऽस्यात्मयज्ञस्य यथान्नमन्नादश्चेति अस्योपव्याख्यानं पुरुषश्चेता प्रधानान्तःस्थः स एव भोक्ता प्राकृतमन्नं भुङ्क्त इति तस्यायं भूतात्मा ह्यन्नमस्यकर्ता प्रधानः तस्मात्त्रिगुणं भोज्यं भोक्ता पुरुषोऽन्तस्थः अत्र दृष्टं नाम प्रत्ययम् यस्माद्बीजसम्भवा हि पशवस्तस्माद्बीजं भोज्यमनेनैव प्रधानस्य भोज्यत्वं व्याख्यातं तस्माद्भोक्ता पुरुषो भोज्या प्रकृतिस्तत्स्थो भुङ्क्त इति प्राकृतमन्नं त्रिगुणभेदपरिणमत्वान्महदाद्यं विशेषान्तं लिङ्गमनेनैव चतुर्दशविधस्य मार्गस्य व्याख्या कृता भवति सुखदुःखमोहसंज्ञं ह्यन्नभूतमिदं जगत् न हि बीजस्य स्वादुपरिग्रहोऽस्तीति यावन्नप्रसूतिः तस्याप्येवं तिसृष्ववस्थास्वन्नत्वं भवति कौमारं

यौवनं जरा परिणमत्वातत्दन्नत्वमेवं प्रधानस्य व्यक्ततां गतस्योपलब्धिर्भवति तत्र बुद्ध्यादीनि स्वादुनि भवन्त्यध्यवसायसङ्कल्पाभिमाना इति अथेन्द्रियार्थान् पञ्चस्वादुनि भवन्ति एवं सर्वाणीन्द्रियकर्माणि प्राणकर्माणि एवं व्यक्तमन्नमव्यक्तमन्नम् अस्य निर्गुणो भोक्ता भोक्तृत्वाच्चैतन्यं प्रसिद्धं तस्य यथाग्निर्वै देवानामन्नदः सोमोऽन्नमग्निनैवान्नमित्येवंवित् सोमसंज्ञोऽयंभूतत्माऽग्निसंज्ञोऽप्यव्यक्तमुखा इति वचनात्पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्त इति यो हैवं वेद संन्यासी योगी चात्मयाजी चेति अथ यद्वन्न कश्चिच्छून्यागारे कामिन्यः प्रविष्टाः स्पृशतीन्द्रियार्थान् तद्वद् यो न स्पृशति प्रविष्टान् संन्यासी योगी चात्मयाजी चेति॥ ६-१०

परं वा एतदात्मनो रूपं यदन्नमन्नमयो ह्ययं प्राणोऽथ न यद्यश्नात्यमन्ताऽश्रोताऽस्प्रष्टाऽद्रष्टाऽवक्ताऽघ्राताऽरसयिता भवति प्राणांश्चोत्सृजतीति एवं ह्याहाथ यदि खल्वश्नाति प्राणसमृद्धो भूत्वा मन्ता भवति श्रोता भवति स्प्रष्टा भवति वक्ता भवति रसयिता भवति घ्राता भवति द्रष्टा भवतीति एवं ह्याह अन्नाद्वै प्रजाः प्रजायन्ते याः कश्चित्पृथिवीशृताः । अतोऽन्नेनैव जीवन्ति अथैतदपि यन्ति अन्ततः॥ ६-११

अथान्यत्रापि उक्तम् सर्वाणि ह वा इमानि भूतान्यहरहः प्रपतन्त्यन्नमभिजिघृक्षमाणानि सूर्यो रश्मिभिराददात्यन्नं तेनासौ तपत्यन्नेनाभिषिक्ताः पचन्तीमे प्राणा अग्निर्वा अन्नेनोज्ज्वलत्यन्नकामेनेदं प्रकल्पितं ब्रह्मणा अतोऽन्नमात्मेत्युपासीतेत्वेयं ह्याह । अनाद्भूतानि जायन्ते जातान्यन्नेन वर्धन्ते अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते॥ ६-१२

अथान्यत्रापि उक्तम् -- विश्वभृद्वै नामैषा तनुर्भगवतो विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य रसो मनः प्राणस्य विज्ञानं मनस आनन्दं विज्ञानस्येति अन्नवान् प्राणवान् मनश्वान् विज्ञानवान् आनन्दवान् च भवति यो हैवं वेद यावान्तीह वै भूतान्यन्नमदन्ति तावत्स्वन्तस्थोऽन्नमत्ति यो हैवंवेद । अन्नमेव विजरन्नमन्नं संवननं स्मृतम् । अन्नं पशूनां प्राणोऽन्नं ज्येष्ठमन्नं भिषक् स्मृतम्॥ ६-१३

अथान्यात्रप्युक्तम् -- अन्नं वा अस्य सर्वस्य योनिः कालश्चान्नस्य सूर्यो योनिः कालस्य तस्यैतद्रूपं यन् निमेषादिकालात्सम्भृतं द्वादशात्मकं वत्सरमेतस्याग्नेयमर्धमर्धं वारुणं मघाद्यं श्रविष्ठार्धमाग्नेयं क्रमेणोत्क्रमेण सार्पाद्यं श्रविष्ठार्धान्तं सौम्यम् तत्रैकैकमात्मनो नवांशकं सचारकविधम् सौक्ष्म्यत्वादेतत्प्रमाणमनेनैव प्रमीयते हि कालः न विना प्रमाणेन प्रमेयस्योपलब्धिः प्रमेयोऽपि प्रमाणतां पृथक्त्वादुपैत्यात्मसम्बोधनार्थमित्येवं ह्याह । यावत्यो वै कालस्य कलास्तावतीषु चरत्यसौ यः कालं ब्रह्मेत्युपासीत कालस्तस्यातिदूरमपसरतीति एवं ह्याह \: कालात्स्रवन्ति भूतानि कालाद्वृद्धिं प्रयान्ति च . काले चास्तं नियच्छन्ति कालो मूर्तिरमूर्तिमान्॥ ६-१४

द्वे वाव ब्रह्मणो रुपे कालश्चाकालश्चाथ यः प्रागादित्यात्सोऽकालोऽकालोऽथ य आदित्यद्यः स कालः सकलः सकलस्य वा एतद्रूपं यत्संवत्सरः संवत्सरात्खल्वेवेमाः प्रजाः प्रजायन्ते संवत्सरेणेह वै जाता विवर्धन्ते संवत्सरे प्रत्यस्तं यन्ति तस्मात्संवत्सरो वै प्रजापतिः कालोऽन्नं ब्रह्मनीडमात्मा चेत्येवं ह्याह कालः पचति भूतानि सर्वाण्येव महात्मनि . यस्मिन् तु पच्यते कालो यस्तं वेद स वेदवित्॥ ६-१५

विग्रहवानेष कालः सिन्धुराजः प्रजानाम् एष तत्स्थः सविताख्यो यस्मादेवेमे चन्द्रर्क्षग्रह संवत्सरादयः सूयन्ते अथैभ्यः सर्वमिदमत्र वा यत्किञ्चित्शुभाशुभं दृश्यन्तेह लोके तदेतेभ्यस्तस्मादादित्यात्मा ब्रह्माथ कालसंज्ञमादित्यमुपासीतादित्यो ब्रह्मेत्येकेऽथ एवं ह्याह . होता भोक्ता हविर्मन्त्रो यज्ञो विष्णुः प्रजापतिः . सर्वः कश्चित्प्रभुः साक्षी योऽमुष्मिन्भाति मण्डले॥ ६-१६

## ऋग्वेदः ६।६३।१-४

ऋषिः वसिष्ठः मैत्रावरुणिः, छन्दः त्रिष्टुप्, देवता सूर्यः॥

उद्वे॑ति सु॒भगो॑ वि॒श्वच॑क्षाः॒ साधा॑रणः॒ सूर्यो॒ मानु॑षाणाम्।
चक्षु॑र्मि॒त्रस्य॒ वरु॑णस्य दे॒वश्चर्मे॑व॒ यः स॒मवि॑व्य॒क्तमांसि॥ १



उद्वे॑ति प्रस॒वी॒ता जना॑नां म॒हान् के॒तुर॑र्ण॒वः सूर्य॑स्य।
स॒मा॒नं च॒क्रं प॑र्या॒विवृ॑त्स॒न्यदे॑त॒शो वह॑ति धू॒र्षु यु॒क्तः॥ २

वि॒भ्राज॑मान उ॒षसा॑मु॒पस्था॑द्रे॒भैरुदे॑त्यनु॒म॒द्यमा॑नः।
ए॒ष मे॑ दे॒वः स॑वि॒ता च॑च्छन्द॒ यः स॑मा॒नं न प्र॑ति॒नाति॒ धाम॑॥ ३

दि॒वो रु॒क्म उ॑रु॒चक्षा॒ उदे॑ति दू॒रे अ॑र्थस्त॒रणि॒र्भ्राज॑मानः।
नू॒नं जनाः॒ सूर्ये॑ण॒ प्रसू॑ता॒ अय॒न्नर्था॑नि कृ॒णव॒न्नपां॑सि॥ ४

## अन्ये ऋचः

एक॑ ए॒वाग्निर्ब॑हु॒धा समि॑द्ध॒ एकः॒ सूर्यो॒ विश्व॒मनु॒ प्रभू॑तः।
एकै॒वोषाः सर्व॑मि॒दं वि भा॒त्येकं॒ वा इ॒दं वि ब॑भूव॒ सर्व॑म्॥ ८-५८-२

दे॒वस्त्वष्टा॑ सवि॒ता वि॒श्वरू॑पः पुपोष॑ प्र॒जाः पु॑रु॒धा ज॑जान।
इ॒मा च॒ विश्वा॒ भुव॑नान्यस्य म॒हद्दे॒वाना॑मसुर॒त्वमेक॑म्॥ ३-५५-१९

गर्भे॒ नु नौ॑ जनि॒ता दंप॑ती कर्दे॒वस्त्वष्टा॑ सवि॒ता वि॒श्वरू॑पः।
नकि॑रस्य॒ प्र मि॑नन्ति व्र॒तानि॒ वेद॑ नाव॒स्य पृ॑थि॒वी उ॒त द्यौः॥ १०-१०-५

स॒वि॒ता य॒न्त्रैः पृ॑थि॒वीम॑रम्णादस्कम्भ॒ने स॑वि॒ता द्याम॑दृंहत्।
अश्व॑मिवाधुक्ष॒द्धुनि॑म॒न्तरि॑क्षमतू॒र्ते ब॒द्धं स॑वि॒ता स॑मु॒द्रम्॥ १०-१४९-१

# तैत्तरीये सन्ध्योपासनविधानम्

सायनभाषसमेतम्

सन्ध्योपासनविधानम् उच्यते, तत्प्रशंसार्थम् आदौ आख्यायिकाम् आह –

रक्षा॑ꣳसि ह॒ वा॑ पुरोनुवा॒के तपो॒ग्रम॑तिष्ठन्त॒ तान् प्र॒जाप॑तिर्व॒रेणो॒पाम॑न्त्र्यत॒ तानि॒ वर॑मवृणीतादि॒त्यो नो॒ योद्धा॒ इति॒ तान् प्र॒जाप॑तिरब्रवी॒द्योध॑य॒ध्वमिति॒ तस्मा॒दुत्तिष्ठन्त॒ꣳ॒ ह॒वा॒ तानि॒ रक्षा॒ꣳस्यादि॒त्यं योध॑यन्ति॒ याव॑दस्त॒मन्व॑गा॒त्तानि॑ ह॒ वा ए॒तानि॒ रक्षा॑ꣳसि गायत्रि॒याऽभि॑मन्त्रित॒नाम्भ॑सा शाम्यन्ति॒ ॰ तै॰आ॰२।२

हवा-शब्दः प्रसिद्ध्यर्थः। पुरोनुवाकः पूर्वकालः, परः इत्येव पूर्वैः अनूच्यते न तु इदानीम् इति वा पश्चात् इति वा उच्यते। एतादृशे पूर्वकाले रक्षांसि खलु उग्रं श्रेष्ठं तीव्रं तपः अतिष्ठन्त कृतवन्तः। तेन तपसा तुष्टः प्रजापतिः तान् रक्षोविशेषान् वरेण उपामन्त्रयतः अपृच्छन् दितवान्, वरं वृणीध्यम् इति उक्त्वा तान् परितोष्य तपसः निवारितवान्। तानि रक्षांसि आदित्यः नः अस्माकं योद्धा भवतु इत्येवं वरम् अवृणीत। प्रजापतिः तान् आदित्येन सह युद्धं कुरुत इत्यनुज्ञां दत्तवान्। तस्मात् कारणात् तानि रक्षांसि, उत्तिष्ठन्तं हवा उद्यन्तम् एव आदित्यं योधयन्ति युद्धे प्रवर्तयन्ति। यावत् आम् आदित्यः अस्तम् अन्वगात् अस्तं प्राप्नोति उदयम् आरभ्य तावत् आदित्येन सह युद्धं कुर्वन्ति। तदा च युद्धे प्रवृत्तानि तानि रक्षांसि तत्सवितुर्वरेण्यम् इत्यनया गायत्र्या अभिमन्त्रितं यत् जलं तेनैव शाम्यन्ति न तु अन्येन केनापि इत्यनेन आख्यानेन जलं प्रशस्य अर्घ्यम् अभिधत्ते –

तदु॑ ह॒ वा ए॒ते ब्र॑ह्मवा॒दिन॑ः पू॒र्वाभि॑मु॒खाः सन्ध्यायां गायत्रि॒याऽभि॑मन्त्रिता॒ आप॑ ऊ॒र्ध्वं विक्षि॑पन्ति॒ ता ए॒ता आपो॑ व॒ज्रीभू॒त्वा तानि॒ रक्षा॑ꣳसि म॒न्देहाऽरु॑ने द्वी॒पे प्रक्षि॑पन्ति॒ ॰

यस्मात् अनेन जलेन रक्षसां शान्तिः, तदु ह वै तस्मात् एव कारणात् एते लोके दृश्यमानाः ब्रह्मवादिनः वेदस्य वक्तारः सन्ध्यायां प्रातः सन्ध्याकाले पुर्वाभिमुखाः सन्तः गायत्र्या अभिमन्त्रितं जलम् ऊर्ध्वं विक्षिपन्ति प्रक्षिपेतुः इत्यर्थः। ताश्च विक्षिप्ताः आपः गायत्रीसामर्थ्यात् वज्ररूपं प्राप्य तानि आदित्ययुद्धार्थम् आगतानि रक्षांसि मन्देहनामकानां रक्षसां स्वभूते कस्मिंश्चित् अरुणनामि द्वीपे प्रक्षिपन्ति। अथ प्रदक्षिणावृत्तिं विधत्ते –

यत्प्र॑दक्षि॒णं प्रक्र॑मन्ति॒ तेन॑ पा॒प्मान॒मव॑ धून्वन्ति ॰

प्रदक्षिणाप्रारम्भम् आवर्तनं प्रक्रमेयुः कुर्युः। तेन च पापक्षयः भवति।

उ॒द्यन्त॑मस्तं॒यन्त॑मादि॒त्यम॑भिध्या॒यन् कु॒र्वन् ब्रा॒ह्म॒णो वि॒द्वान् स॒कल॑ं
भ॒द्रम॑श्नुते॒ऽसावा॑दि॒त्यो ब्र॒ह्मेति॒ ॰

अयं परिदृश्यमानः आदित्यः ब्रह्म इति शास्त्रतः विद्वान् पुमान् उद्यन्तम् अस्तं यन्तं वा आदित्यं तथा ध्यायन् प्रदक्षिणं च कुर्वन् वर्तते सः पुमान् सकलं भद्रम् अश्नुते श्रेयः प्राप्नोति॥ वेदनं प्रशंसति –

ब्र॒ह्मैव सन् ब्रह्मा॒प्येति॒ य ए॒वं वेद॑॥

यः पुमान् आदित्यः ब्रह्म इति वेद सः पुमान् पूर्वम् अजानानोऽपि स्वयं वस्तुतः ब्रह्म एव सन् प्राप्तात् वेदनात् अज्ञानापगमे सति स्वानुभवेन अपि ब्रह्म आप्नोति॥

# गायत्रीगीता

[16] ॐ इत्येव सुनामधेयम् अनघं विश्वात्मनो ब्राह्मणः।
सर्वेष्वेव हि तस्य नामसु वसोः एतत्प्रधानं मतम्॥
यं वेदान् निगदन्ति न्यायनिरतं श्रीसच्चिदानन्दकम्।
लोकेशं समदर्शिनं नियमनं चाकारहीनं प्रभुम्॥ १

भूर्वै प्राण इति ब्रवन्ति मुनयो वेदान्तपारं गताः।
प्राणः सर्वविचेनतेषु प्रसृतः सामान्यरूपेण च।
एतेनैव विसिद्ध्यते हि सकलं नूनं समानं जगत्।
द्रष्टव्यः सकलेषु जन्तुषु जनैः तत्यं ह्यसुश्चात्मवत्॥ २

[16] मूलग्रन्थः एकः एव उपलब्धः, यत्र मुद्रणदोषाः अधिकाः। शोधनम् आवश्यकम्।

भुवो नाशो लोके सकलविपदां व निर्गादतः।
कृतं कार्यं कर्त्तव्यम् इति मनसा चास्य करणम्॥
प्लाशां मर्त्या ये विदधति न वै कर्मनिरताः।
लभन्ते नित्यं ते जगति हि प्रसादं सुमनसाम्॥ ३

स्वरेषो वै शब्दो निगदति मनः स्थैर्यकरणम्।
तथा सौरण्यं स्वास्थ्यं ह्युपदिशति चित्तस्य लोलेताम्।
निमग्नत्वं सत्यव्रत सरसि चाचक्षति उत्त।
त्रिधा शान्तिं ह्येतौ भुवि च लभते संयमरतः॥ ४

ततो वै निष्पत्तिः स भुवि मतिमान् पण्डितवरः।
विजानन् गुह्यं यो मरणजीवनयोस्तदखिलम्॥
अनन्ते संसारे विचरति भयासक्तिरहितः।
तथा निर्माणं वै निजगति विधिनां प्रकुरुते॥ ५

सवितुस्तु पदं वितनोति ध्रुवं मनुजो बलवान् सवितेव भवेत्।
विषयाजनुभूतिपरिस्थितयो वै सदात्मन एव गणेदिति सः॥ ६

वरेण्यां चैतद्वै प्रकटयति श्रेष्ठत्वम् अनिशम्।
सदा पश्येच्छ्रेष्ठं मननयति श्रेष्ठस्य विदधेत्।
तथा लोके श्रेष्ठं सरलमनसा कर्म च भजेत्।
तदित्थं श्रेष्ठत्वं व्रजति मनुजः शोभितगुणैः॥ ७

भर्गो व्याहृति पदं हि नितरां लोकहृ सुलोको भवेत्
पापे पापविनाशने त्वविरतं दत्तावधानां वसेत्।
दृष्ट्वा दुष्कृतिदुर्विपाक-निचयस्तेभ्यो जुगुप्सेद्धि च।
तन्नाशाय विधीयतां च सततं सङ्घर्षम् एभिः सह॥ ८

देर्वेदयेति तु ध्याकोत्यमरतां मर्त्योऽपि सम्प्राप्यते।
देवानाम् इव शुद्धदृष्टिकरणात् सेयोपचारद भुवि॥
निःस्वार्थप्रार्थकर्मकरणात् दीनायदानात् तथा।
बाह्याभ्यन्तरम् अस्य देवभुवनं संयुज्यते चैव हि॥ ९

धीमहि भवेत सर्वविधं शुचिं शाक्तिचयं वयम् इत्युपदिष्टाः खलु।
नो मनुजो लभते सुखशान्तिम् अनेन विनेति यदन्ति हि वेदाः॥ १०

धियो मत्योन्मथ्यागम-निगम-मन्त्रान् सुमतिमान्।
विजानीयात् तत्त्वं विमलनवनीतं परम् इव॥
यतोऽस्मिन् लोके वं संशयगतविचार-स्थल-शते।
मतिः शुद्धैवाछा प्रकटयति सत्यं सुमनसे॥ ११

यो नो वास्ति तु शक्तिसाधनचयो न्यूनाधिकश्चाथवा।
भागं न्यूनतमं हि तस्य विदधेमात्मप्रसादाय च॥
यत्पश्चाद् अवशिष्टभागम् अखिलं त्यक्त्वा फलाशां हृदि।
तद्धीनेष्वभिलाषवस्तु वितरेः ये शक्तिहीनाः स्वयम्॥ १२



प्रचोदयात् स्वयं त्वितरश्चि मानवान्।
नरः प्रयाणाय च सत्यवर्त्मनि॥
कृतं हि कर्माखिलम् इत्थम् अङ्गिना।
वदन्ति धर्म इति हि विपश्चितः॥

गायत्रीगीतां ह्येतां यो नरो वेत्ति तत्त्वसः।
स मुक्त्वा सर्वदुःखेभ्यः सदानन्दे निमज्जति॥

# गायत्र्याः एव अर्थं प्रतिपादयतः भाष्यान्तराणि

## श्रीचन्द्रशेखरभारत्याः भाष्यं विवेकचूडामणौ

अत्रैव सत्त्वात्मनि धीगुहायां अव्याकृताकाश उरुप्रकाशः।
आकाश उच्चै-रविवत् प्रकाशते स्वतेजसा विश्वम् इदं प्रकाशयन्॥ १३४

अत्र एव, साधकशरीरे एव, सत्त्वम् आत्मा यस्याः धीगुहायां सा सत्त्वात्मा सत्त्वप्रधाना या धीः सा एव गुहा। "गूहु संवरणे" इति धातुना, विज्ञानमयकोशत्वेन आत्मानं संवृणोति इति तस्यां धीगुहायाम्। उपादानत्वेन अनुस्यूतः यः अव्याकृताकाशः माया तस्मिन् अव्याकृताकाशे। उरुप्रकाशः उरुः अधिकः प्रकाशः ज्ञानरूपतया सर्वावभासकत्वात् "तद्देवा ज्योतिषां ज्योतिः" इति श्रुतेः। आकाशः परमात्मा स्वतेजसा सूर्यादि-सकल-ज्योतिरवभासक-ज्ञानरूप-प्रकाशेन "येन सूर्यस्तपति तेजसेद्धः" इति श्रुतेः। इदं विश्वं दृश्यं सर्वम्। प्रकाशयन् स्फोरयन् रविवत् सूर्यवत्। उच्चैः प्रकाशते सर्वोत्कर्षेण भासते। उच्चै-रविवत् इति वा अन्वयः आकाशमध्यवर्ति-सूर्यः इव इत्यर्थः। एतेन पूर्वश्लोके "एषोन्तरात्मा पुरुषः" इत्यत्र कथितः पुरि शरीरे शेते इति कारणशरीरे प्रकाशते इति कथनात् विवृतः। सकलदिगवस्थित-वस्तुभासकत्वं गगनतलमध्यवर्ति-रवेः प्रसिद्धम्। तद्वत् सर्वातरः आत्मा सकलवस्त्ववभासकः इति भावः॥

# गायत्र्याः महत्त्वबोधकश्लोकाः

सर्वेषां वेदानां गुह्योपनिषत्सारभूतां
ततो गायत्रीं जपेत्॥ छान्दोग्य उ॰ परि॰

गायत्री छन्दसां मातेति॥ महारण्यक उ॰

न गायत्र्याः परं मन्त्रं, न मातुह् परदेवतम्॥ आर्षसूक्तिः

सर्ववेदसारभूता गायत्र्यास्तु समर्चना।
ब्रह्मादयोऽपि सन्ध्यायां तां ध्यायन्ति जपन्ति च॥ देवी भा॰ ६,१६/१५

गायत्री-मात्र-निष्णातो द्विजो मोक्षम् अवाप्नुयात्॥ देवी भा॰ १२,८/१९

गायत्र्युपासना नित्या सर्ववेदैः समीरिता।
यया विना त्वधः पातो ब्राह्मणस्यास्ति सर्वथा॥ देवी भा॰

विहाय तां तु गायत्रीं विष्णूपासनतत्परः।
शिवोपासनतो विप्रो नरकं याति सर्वथा॥ देवी भा॰

योऽधीतेऽहन्यन्येतां त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान्॥ मनुस्मृतिः

गायत्री चैव वेदाश्च ब्रह्मणा तोलिता पुरा।
वेदेभ्यश्च चतुर्भ्योऽपि गायत्र्यतिगरीयसी॥ पराशरस्मृतिः

यथा मधु च पुष्पेभ्यो घृतं दुग्धाद् रसात् पयः।
एवं हि सर्ववेदानां गायत्री सार उच्यते॥ व्यासः

गायत्रीं चिन्तयेद् यस्तु हृत्पद्मसमुपस्थिताम्।
धर्माधर्मविनिर्मुक्तः स याति परमां गतिम्॥ व्यासः

तदित्यृचः समो नास्ति मन्त्रो वेदचतुष्टये।
सर्वे वेदाश्च यज्ञाश्च दानानि च तपांसि च।
समानि कलया प्राहुर्मुनयो न तदित्यृचः॥ विश्वामित्रः

कुर्याद् अन्यन्न वा कुर्यात् इति प्राह मनुः स्वयम्।
अक्षय-मोक्षम् अवाप्नोति गायत्री-मात्र-जापनात्॥ शौनुकः

गायत्री वेद-जननी गायत्री पाप-नाशिनी।
गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम्॥ याज्ञवल्क्यः

गायत्रीं चैव वेदाश्च तुलये समतोलयन्।
वेदा एकत्र साङ्गास्तु गायत्री चैकतस्थिता॥ याज्ञवल्क्यः

गायत्री वेद-जननी गायत्री लोक-पावनी।
न जायत्र्याः परं जप्यं एतत् विज्ञानम् उच्यते॥ कूर्म पु॰

जकारो जन्मविच्छेदः पकारो पापनाशनः।
जन्मकर्म हरो यस्मात् यस्माज्जप इतीर्यते॥

यदह्नात् कुरुते पापं तदह्नात् प्रतिमुच्यते।
यद्रात्र्यात् कुरुते पापं तद्रात्र्यात् प्रतिमुचते॥

सर्वेषां चैव पापानां सङ्करे समुपस्थिते।
दशसहस्रकाभ्यासः गायत्र्याः शोधनं परम्॥

गायत्रीम् एव यो ज्ञात्वा सम्यगुच्चरते पुनः।
इहामुत्र च पूज्योऽसौ ब्रह्मलोकम् अवाप्नुयात्॥

हस्तत्राणप्रदा देवी पततां नरकार्णवे।
तस्मात् ताम् अभ्यसेन्नित्यं ब्राह्मणो हृदये शुचिः॥

बहुना किमिहोक्तेन यथावत् साधु साधिता।
द्विजन्मानाम् इयं विद्या सिद्धिकाम-दुघा स्मृता॥

गायत्रीं तु परित्यज्य अन्यमन्त्रान् उपासते।
त्यक्त्वा सिद्धान्नम् अन्यत्र भिक्षाम् अटति दुर्मतिः॥

ब्रह्मणो हृदयं विष्णुः विष्णोरपि शिवः स्मृतः।
शिवस्य हृदयं सन्ध्या तेनोपास्या द्विजातिभिः॥

# सन्ध्याकथा विष्णुपुराणस्था

उषा रात्रिः समाख्याता व्युष्टिश्चाप्युच्यते दिनम्।
प्रोच्यते च तथा सन्ध्या उषाव्युष्ट्योर्यदन्तरम्॥ २।८।४९

सन्ध्याकाले च संप्राप्ते रौद्रे परम-दारुणे।
मन्देहा राक्षसा घोराः सूर्यम् इच्छन्ति खादितुम्॥ ५०

प्रजापति-कृतः शापस्तेषां मैत्रेय! रक्षसाम्।
अक्षयत्वं शरीराणां मरणं च दिने दिने॥ ५१

ततः सूर्यस्य तैर्युद्धं भवत्यत्यन्तदारुणम्।
ततो द्विजोत्तमास्तोयं संक्षिपन्ति महामुने!॥ ५२

ॐकार-ब्रह्म-संयुक्तं गायत्र्या चाभिमन्त्रितम्।
तेन दह्यन्ति ते पापा वज्री-भूतेन वारिणा॥ ५३

अग्निहोत्रे हूयते या समन्त्रा प्रथमाहुतिः।
सूर्यो ज्योतिः सहस्रांशुस्तया दीप्यति भास्करः॥ ५४



ॐकारो भगवान् विष्णुस्त्रिधाम वचसां पतिः।
तदुच्चारणतस्ते तु विनाशं यान्ति राक्षसाः॥

वैष्णवोंऽशः परः सूर्यो योऽन्तर्ज्योतिरसम्प्लवम्।
अभिधायक ॐकारस्तस्य तत्प्रेरकः परः॥

तेन संप्रेरितं ज्योतिरोङ्कारेणाथ दीप्तिमत्।
दहत्यशेषरक्षांसि मन्देहाख्यान्यघानि वै॥ ५७

तस्मान्नोल्लङ्घनं कार्यं सन्ध्योपासनकर्मणः।
स सन्ति सूर्यं सन्ध्याया नोपास्तिं कुरुते तु यः॥ ५८

ततः प्रयाति भगवान् ब्राह्मणैरभिरक्षितः।
बालखिल्यादिभिश्चैव जगतः पालनोद्यतः॥ ५९

॥ ग्रन्थोऽयं समाप्तः ॥

॥ इति शम् ॥

# पत्रऋणम्



आदित्यहृदयस्तोत्रम्, आदित्यहृदयस्तोत्ररत्नम्॥ वेङ्कटसुब्रह्मण्येण संशोधितम्॥ सरस्वती महाल् ग्रन्थालयः, तन्जावूर्॥

आह्निकचन्द्रिका, श्रीमत्सायनमन्त्रभाष्यसहिता। निर्णयसागरमुद्रणालये॥

कृष्णयजुर्वेदीयसन्ध्यावन्दनं सभाष्यम्। श्रीबालमनोरम-प्रेस्।

गायत्री का मन्त्रार्थ। प॰ श्रीरामशर्मा आचार्येण।

गायत्रीपुरश्चरणपद्धतिः। वे॰ वैद्युपाह्वरंगनाथशास्त्रिणा संशोधिता।
आनन्दाश्रमसंस्कृतग्रन्थावलिः ७३॥

गायत्रीभाष्यम्। श्रीपैङ्गानाडु-गणपतिशास्त्रिणा विरचितम्।

गायत्रीमहामन्त्रः। द्वादशदर्शनाराच्य-स्वामीकाशिकानन्दगिरिणा।
आनन्दवनग्रन्थमालायाः ३१ कुसुमम्॥

गायत्रीरहस्यम्। आचार्यपण्डितश्रीशिवदत्तशास्त्रिणा। शिवग्रन्थमाला, ग्रन्थांक १६॥

गायत्रीवरिवस्या। डा॰ मण्डनमिश्रेण, डा॰ रुद्रदेवत्रिपाठिना।
श्रीलालबहुदारशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठः॥

गायत्रीसिद्धिः। डा॰ चमनलाल गौतमेन। संस्कृति संस्थान

गोपथब्राह्मणम्। राजेन्द्रलालमित्रेण हरचन्द्रविद्याभूषणेन च शोधितम्॥

छान्दोगाह्निकोद्धारः। महामहोपाध्यायश्रीशङ्करमिश्रकृतेन। कामेश्वरसिंह-
दरभङ्गा-संस्कृतविश्वविद्यालयः। महाराजाधिराज-कामेश्वरसिंह-
ग्रन्थमालायाः एकादशपुषपम्॥

छान्दोग्योपनिषदः शाङ्करभाष्यम्॥ विविधग्रन्थाः॥

तत्त्वलोकपत्रिकायाः गायत्रीविषयकलेखाः (औगस्त / सेटम्बर १९९०)

प्रकरणद्वादशी। श्री एस॰ सुब्रह्मण्यशास्त्रिणा। महेश-अनुशासन्धान-संस्थानम्॥

बोधायनधर्मसूत्रं, श्रीगोविन्दस्वामीप्रणीतविवरणसमेतम्। श्रीनिवासाचार्येण शोधितम्। Biblioteca Sanskrita – No 34.

मैत्रेयण्युपनिषत्। सुन्दरहट्टाङ्गिना उट्टङ्कितम्। sanskritdocuments.org.

विवेकचूडामणिभाष्यम्। जगद्गुरुणा चन्द्रशेखरसरस्वतिना रचितम्।

शिखरिणीमाला, शिवतत्त्वविवेकव्याख्यानसमन्विता, श्रीमदप्पयदीक्षितप्रणीता। श्रीकृष्णशर्मणा सम्पादितम्। राजस्थान-संस्कृत अकादमी॥

सन्ध्याभाष्यसमुच्चयः। विनायक गणेश आपटे। आनन्दाश्रमग्रन्थावलिः ४०॥

स्मृतिमुक्ताफलम्, आह्निककाण्डम्॥ वैद्यनाथदीक्षितेन विरचितम्॥

Gayatri. वीरस्वामी पट्टर्॥

The location of Gayatri Mantra in RgVeda. Dr. M.V.Praphulla.

The super science of Gayatri. प॰ श्रीराम शर्म आचार्येन लिखितम्॥

## अन्ये विषयकग्रन्थाः

OM, Gayatri and Sandhya। स्वामि-मुख्यानन्देन। श्रीरामकृष्णमठः॥

वेद माता श्री गायत्री। के. मुरलीधरेन सङ्कलितम्। ambaa.org

श्रीगायत्री शङ्करभाष्यम्। भुवनेश्वरीपीठस्थेन श्री श्री चिदानन्दसरस्वती स्वामिना रचितम्॥

सन्ध्यातत्त्वसुबोधिनी। सौमयाजुल वेङ्कटाचलशसत्रिणा प्रणीतम्। आन्ध्र विज्ञान समितिः॥

सामान्योपनिषदः, सावित्र्योपनिषत्। उपनिषदब्रह्मयोगी॥